THE ORIENTAL THOUGHT SERIES

General Editor:—
Dr. G. V. Devasthali
M. A., B. T., Ph. D.

No. 3

शृङ्गारवैराग्यतरङ्गिणी of सोमप्रभाचार्य

with

सुखबोधिकाख्या तरी by नन्दलाल

Edited by:—
Dr. G. V. Devasthali
M. A., B. T., Ph. D.

NASIK, April, 1955.

INTRODUCTION

The Śṛṅgāravairāgya-taraṅgiṇī of Somaprabhasūri together with a short commentary (ṭīkā) thereon composed by Nandalāla, which is being presented to our readers as No. 3 of the Oriental Thought Series is based on five manuscripts. Two of these contain both the text as well as the commentary while the remaining three contain the text and not the commentary that is presented here but a sort of avacūri or a gloss (upto st. 35 only) explaining the main point to be noted in each stanza. One of these MSS. is from the Chiplunkar Collection of MSS. in the H.P. T. College, Nasik; while the rest belong to the Bhandarkar Oriental Research Institute, Poona, secured by me for collation through the kindness of my friend, Dr. P. K. Gode.

The present work as also the commentary, it must be observed, has been already printed as far back as 1888 A. D. as No. 6 in the Kāvyamālā, part V--- a very useful series published by the Nirnaya Sagara press, Bombay. A perusal of this edition, however, would show that it is based on only one manuscript referred to in the foot notes as the mūla-pustaka. A glance through these foot notes makes it again quite clear that the MS. presents several readings in the text (of the work of Somaprabhasūri) which the editors, Pt. Durgaprasada and Shri K. P. Parab, found unacceptable. Evidently the wording of the commentary has been utilised by them for the purpose of fixing up the wording of the text; and wherever they found the latter disagreeing with the former, they have thought it expedient to relegate it to the position of a foot note. But they appear to have had no critical apparatus on the basis of which to fix up the exact wording of the commentary. This is also evident from the fact that the foot-notes notice variant readings in the text only and not even one such reading has been noticed in the commentary. In spite of the

best efforts and erudition bestowed on it, therefore it was but inevitable that the Kāvyamālā edition of the present work could not be a critical edition in the real sense of the term. That several inaccuracies have crept into the Kāvyamālā edition will be clear even by a cursory glance through the foot-notes in the present edition where the readings from the former have been noticed with the letter N. A few important variants will also be discussed below, thus making clear to the reader the advantage that the present editor has derived from the MSS. material available to him. Before doing that, however, let us turn our attention to the critical apparatus that has been utilised for this edition.

As already noted above the present edition is based on five MSS. in all, named A B C D and E respectively for convenience of reference.

A. This is No. 627 of Dr. Peterson's Collection of 1895-98 now deposited at the Bhandarkar Oriental Research Institute, Poona. It has 19 folios measuring 10 in. by $4\frac{1}{4}$ in. and having 11 lines in a page and 38 letters in a line. The folios have margins in double red lines on either side and have the commentary above and below the text which is written in the middle in a slightly bolder hand. The pratīkas and figures indicating the number of the stanza are often marked red. The right hand margin on the verso has the word वैराग्य at the top while the left hand one has the number of the folio. The margins on the quarto are both left blank. Yellow pigment has been used in some places to effect corrections. Some reader also seems to have introduced some corrections either between the lines or in the margin in black ink only. In the case of the first few stanzas some reader has tried to indicate the prose order by putting figures over the words in them to indicate the number they would have in prose order. The MS. is not very correctly written and has several defects such as dropping of not only letters but sometimes even several words or even a few sentences. Pṛṣṭhmātṛkas have been used only occasionally which sometimes makes it difficult to read it. The MS. begins on fol. 1b and ends on fol. 19a which has no margins at all. Fol. 1a (having margins like others) and 19b (without margins) have the name of the work.

B This is No. 1383 of Dr. Bhandarkar's Collection of 1884-87 also deposited at the BORI., Poona. It has 13 folios measuring 5 in. by $19\frac{1}{2}$ in. and having about 14 lines in a page and about 38 letters in a line. The folios have triple margin in red ink on either side and have the text in the middle with the commentary both above and below it. The MS. begins on fol. 1b and ends on fol. 13 b. Fol. 1a has margins like others and bears besides the name of the work the date Saṁvat 1732 written by some other hand in black ink. The writer has himself sometimes introduced corrections in his usual hand; but in other places some reader also appears to have done so in black ink. Pṛṣṭhmātṛkas have been used more frequently and the writing is in Jain Devanāgarī characters. This MS. also is defective in some places; but on the whole it is more accurate than the one noted above.

C. This is No. 637 of Dr. Bhandarkar's Collection of 1884-87 also deposited at BORI, Pooa. It has only five folios not very accurately written in Jain Devanāgarī characters and contains only the text. The folios measure $10\frac{1}{2}$ in. by 4 in.; and have 13 lines on each page and about 30 letters in a line. The MS. begins on fol. 1a and ends on fol. 5a. Fol. 5b is blank; but all folios have margins in triple lines in black ink on either side. At the centre of each folio in three or four lines letters are so spaced as to give the appearance of a square with their angular points directed towards the margins and the top and bottom of the page. The figures indicating the numbers of stanzas are marked red; and some reader has inserted corrections in black ink in the margins. Pṛṣṭhamātṛkās have been used to a large extent and in some places the MS. becomes hard to read owing to slovenliness of hand-writing. Besides the text the MS. also contains a gloss which follows every stanza from the text (upto st. 35), so that the text and the gloss stand intermingled. This gloss is the same as in the next two MSS. The scribe's colophon reads:--- पंडितश्रीहायर्षिगणितच्छिष्यग० बुद्धिविमलेनालेखि । ग० कनकविजयवाचनार्थम् ॥

D. This is No. 1423 of Prof. Kathavate's Collection of 1891-95 also deposited in the BORI, Poona containig only three folios 10 in. by 4 in., having the text written in very neat Jain Devanāgarī characters with ample use of pṛṣṭhamātṛkās. The writer himself has introduced corrections in the same black ink in smaller letters between the lines or rarely in the margins which are marked on each folio with double lines in red ink. The MS. begins on fol. 1a and ends on fol. 3a, fol. 3b being left blauk. Besides the text which occupies almost the whole of each folio, the same writer has written in very tiny characters a gloss or avacūri which is the same as in MSS. C and E. This gloss appears both above and bellow the text of the stanzas on foll. 1 and 2 and upto st. 35 only. There are 13 lines in a page and 48 letters in a line.

E. This is No. C.X.5 from the Chiplunkar Collection now deposited in the H. P. T. College Library, Nasik. It contains 12 folios measuring 10 in. by 4 in. having 7 lines in a page and about 33 letters in line. It contains the text, intermingled with the same gloss as in the above MSS., written in ordinary Devanāgarī characters and is full of inaccuracies which except in two places are left uncorrected. It begins on foll. 1b and ends on foll. 11a. Fol. 12a is blank while foll. 1a and 12b have the title of the work. All the folios are marked with double margins in red ink and foll. 1a and 12b have also horizontal double lines so as to form a rectangle in which the name of the work is written. On the verso of each folio in the margin we have letters suggesting the title of the work. The MS. was copied on Caitra paurṇimā of Saṁvat 1896 by one Vāsudeva as is shown by the following colophon occurring at the end.--

वैराग्याम्बुनिधौ निमग्नमनसा त्रस्तेन मात्रासुखध्वान्तभ्रान्तिनटीविलासविषतस्तुष्टेन सत्संगतः । श्रीराधारमणांघ्रिसारसजुषा श्रीवासुदेवेन वै स्वानन्दं परमं गतेन लिखिता वैराग्यमुक्तावली ॥ मिति चैत्र शुद्ध १५ संवत् १८९६ ॥

श्रीः ।

सोमप्रभाचार्यविरचिता शृङ्गारवैराग्यतरङ्गिणी ।

श्रीनन्दलालविरचितसुखबोधिकाख्यतरीसमेता ।

श्रीपार्श्वनाथं प्रणिपत्य भक्त्या
    [1]पुरि स्थितं श्रीफलवर्धिकायाम् ।
शृङ्गारवैराग्यत[2]रङ्गिणी या
    व्याख्यानतो * व्याक्रियते मया सा ॥ ६

श्रीसोमप्रभाचार्या वैराग्यवासनया शृङ्गारं दूषयन्तः शृङ्गारवैराग्यतरङ्गिणीनामानं ग्रन्थं कर्तुकामाः स्त्रीरूपं निन्द्यमिति प्रतिपादयन्त ऊचुः । १

धर्मारामदवाग्निधूमलहरीलावण्यलीलाजुषस्
तन्वङ्ग्या यमितान् [3]विलोक्य यदहो बालान् किमुत्कण्ठसे ।
व्यालान् दर्शनतोऽपि मुक्तिन[4]गरप्रस्थानविघ्नक्षमान्
मत्वा दूरममून् विमुञ्च कुशलं यद्यात्मनो वाञ्छसि ॥ १ ॥

धर्मारामेति । अहो इत्याश्चर्ये । तन्वङ्ग्याः तनु* सूक्ष्ममङ्गं यस्याः सा तन्वङ्गी तस्याः स्त्रिया यमितान् बद्धान् बालान् केशान् विलोक्य दृष्ट्वा किमुत्कण्ठसे

---

1 पुरस्थिश्रीफ० A. 2 तरङ्गिणीयाः A; तरङ्गिणीया B * व्याख्यानना A B
3 विलोक्य तदहो B; विलोकितुमहो C D E Nn. 4 °नगरी °C E.
विमुक्तिनगर Nn. * तनुः N.

किमुत्कण्ठां[5] करोषि । कथंभूतान् बालान् । धर्मारामदवाग्निधूमलहरीलावण्य-लीलाजुषः धर्म एवारामो वन तत्र यो दवाग्निर्दावानलः तस्य या धूमलहरी धूमश्रेणिः तस्या यल्लावण्यं श्यामत्वं तस्य लीलां जुषन्ते सेवन्ते इति लीलाजुषः तान् । ' जुषी प्रीतिसेवनयोर्धातुः ' * । दवाग्निधूमपङ्क्तिसदृशान् इत्यर्थः । अथ वैराग्यरसेन शृङ्गारं दूषयति । रे मनुष्य यदि त्वमात्मनः स्वस्य कुशलं कल्याणं वाञ्छसि तदा अमून् बालान् व्यालान् सर्पान् मत्वा ज्ञात्वा‡ । कृष्णवर्णत्वाल्ल-म्बायमानत्वाच्च सर्पसादृश्यं बालानां युक्तमेव । दूरं विमुञ्च दूरतस्त्यजे[6]त्यर्थः । सर्पं दृष्ट्वा यथा दूरमेव पलायते तथा त्वमपि दूरं पलायस्वेत्यर्थः । किम्भूतान्[7] बालान् । दर्शनतोऽपि मुक्तिनगरप्रस्थानविघ्नक्षमान् मुक्तिरेव नगरः × तत्र यत् प्रस्थानं गमनं तत्र विघ्नाय विघ्नं कर्तुं क्षमाः समर्थाः तान् । सर्पस्य दर्शनादेव गमने विघ्नसमुत्पत्तिरिति शकुनशास्त्रे प्रसिद्धम् । तन्वङ्ग्या यमितान्[8] बालान्[9] व्यालान् जानीहि । तथाहि श्लेषार्थो यं यकारमिताः प्राप्ताः संयुक्ता वा बाला व्याला भवन्तीति युक्तमेव बालानां व्यालत्वम् । [10]इदं शार्दूलविक्रीडितं नाम छन्दः ॥ १ ॥

ये केशा लसिताः सरोरुहदृशां चारित्रचन्द्रप्रभा--
ध्वंशाम्भोदसहोदरास्तव सखे चेतश्चमत्कारिणः ।
क्लेशान् मूर्तिमतोऽवगम्य + नियतं दूरेण तानुत्सृजे--
र्नो चेत् कष्टपरम्परापरिचितः शोच्यां दशामेष्यसि ॥ २ ॥

हे सखे सरोरुहदृशां सरोरुहाणि कमलानीव दृशो नेत्राणि यासां ताः सरोरुहदृशस्तासां स्त्रीणां ये लसिता देदीप्यमानाः केशाः तव चेतश्चमत्कारिणः

---

5 उत्कण्ठं A उत्कण्ठतां B. * In पाणिनीय धातुपाठ in the तुदादिगण we have ' जुषी प्रीतिसेवनयोः ' as the 8th सूत्र. ‡Omitted N. 6 त्यजेदित्यर्थः A. 7 किं॰ व्यालान् A; किं वालान् B. × नगरं N. 8 Omitted A. 9 Omitted A. 10 The whole sentence omited. A N. + °त्य नियतं दूरे च Nn.

चित्तप्रसत्तिकारकाः[11] वर्तन्त इति शेषः । किंभूताः केशाः । चारित्रचन्द्रप्रभांशाम्भोदसहोदराः चारित्रमेव चन्द्रप्रभा ज्योत्स्ना तस्या अंशे नाशने अम्भोदो मेघस्तस्य सहोदराः सदृक्षाः । केशानां श्यामत्वादम्भोदसदृशत्वम् । तान् केशान् मूर्तिमतः चक्षुरिन्द्रियगम्यान् क्लेशान् । नियतं निश्चयेन । अवगम्य बुद्ध्वा । दूरेण[12] दूरादेव त्वमुत्सृजेः त्यजेः । नो चेदिति । यदि न त्यजसि तदा त्वं शोच्यां शोचनीयां दशामवस्थां एष्यसि प्राप्स्यसि । किंभूतस्त्वम् । कष्टपरम्परापरिचितः कष्टानां या परम्परा श्रेणिः तया परिचितः युक्तः । स्त्रीणां केशान् क्लेशान् ज्ञात्वा त्यजेत्यर्थः[13]। केशाः क्लेशाः कथं स्युरिति प्रश्ने लसिताः लेन लकारेण सिता बद्धाः केशाः क्लेशा भवन्तीत्यर्थः ॥ २ ॥

ये शुद्धबोधशशिखण्डनराहुचण्डा-
श्चित्तं हरन्ति तव वक्रकचाः कृशाङ्ग्याः ।
ते निश्चितं सुकृत[14]मर्त्यविवेकदेह-
निर्दारणे ननु नवक्रकचाः स्फुरन्ति ॥ ३ ॥

हे पुमन् कृशाङ्ग्याः कृशं सूक्ष्ममङ्गं यस्याः सा तस्याः ये वक्रकचाः वक्रकेशाः तव चित्तं हरन्ति तव चेतसि चमत्कारमुत्पादयन्ति इत्यर्थः । कथंभूता वक्रकचाः । शुद्धबोधशशिखण्डनराहुचण्डाः शुद्धबोधो निर्मलं ज्ञानं स एव शशी तस्य खण्डने अर्थात् कवलने राहुरिव चण्डाः क्रूराः । फलितार्थस्तु राहुर्यथा चन्द्रं ग्रासीकरोति तथा एते तव वक्रकचा ज्ञाननाशका इत्यर्थः । ननु निश्चितं ते वक्रकचाः सुकृतमर्त्यविवेकदेहनिर्दारणे सुकृतमेव मर्त्यः , तस्य यद्× विवेक एव देहं*, तस्य निर्दारणे विदारणे नवक्रकचाः नवाश्च ते क्रकचाश्च नवक्रकचाः नूतन-

11 कारिणं B. कारिणः N. 12 Omitted B. 13 The whole sentence omitted A 14 सुकृती० D E. ×यो N. * देहः N.

करपत्राणि । ‘ क्रकचं पुंनपुंसकम् । करपत्रम् च ’ इति नामकोशः । स्फुरन्ति स्फुरद्रूपा वर्तन्त इत्यर्थः । अत्र वक्रकचाः× नवक्रकचाः इति भिन्नश्लेष एव चमत्कारः । वसन्ततिलको[15] छन्दः[15] ॥ ३ ॥

अलङ्कृतं कुन्तलभारमस्या
विलोक्य लोकः कुरुते प्रमोदम् ।
वैराग्यवीरच्छिदुरं दुरन्त-
ममुं न किं पश्यसि कुन्तभारतम् ॥ ४ ॥

अस्याः नायिकायाः कुन्तलभारं बद्धकेशसमूहं, ‘कुन्तलाः संयता[16] ये स्युः’ इति नामकोशः[17] । विलोक्य लोकः प्रमोदं हर्षं कुरुते । कथंभूतं कुन्तलभारम् । अलङ्कृत पुष्पादिना संस्कृतम् । अमुं कुन्तलभारं किं कुन्तभारं ‘ कुन्तः प्रासोऽथ मुद्गर ’ इति नामकोशः । न पश्यासि । कथंभूतं कुन्तभारम् । वैराग्यमेव वीरः सुभटः तस्य छिदुरः छेदनशीलः तम् । पुनः कथंभूतं कुन्तभारम् । दुरन्तं दुष्टमन्तं प्रान्तं यस्य तम् । अन्ते तीक्ष्णत्वात् दुःसहमित्यर्थः । कुन्तलभारं कुन्तभारं कथं स्यात् । न विद्यते लः लकारो यस्य सोऽलः तम् अलं कृतं विहितं लकाररहितं कुन्तलभारं कुन्तभारं स्यादेवेत्यर्थः । उपेन्द्रवज्रा[18] नाम[18] छन्दः[18] ॥ ४ ॥

[19]कस्तूरिकातिलकितं तुलिताष्टमीन्दु
चित्ते विचिन्तयसि सौख्यनिमित्तमेकम् ।
वामभ्रुवां यदलिकं तदहो अलीक[20]-
मित्याख्ययैव परया प्रवदन्ति[21] रूपम् ॥ ५ ॥

× क्रकचाः N
15 Omitted A N.
16 संयतास्ते A.
17 कोशः B N.
18 Omitted A N.
19 This stanza occurs as No. 12 C D E.
20 ह्यलीकं E.
21 वदति स्वरूपम् C D E. Nn.

वामभ्रुवां स्त्रीणां यत् अलिकं ललाटं एकमद्वितीयं सौख्यनिमित्तं सुखकारणं चित्ते विचिन्तयसि । कथंभूतमलिकम् । कस्तूरिकातिलकितं तिलकं जातं यस्य तत् तिलकितं कस्तूरिकया तिलकितं कस्तूरिकातिलकितम्× । पुनः कथंभूतमलिकम्[22] । तुलिताष्टमीन्दु तुलितोऽष्टम्या इन्दुर्येन तत् अष्टमीचन्द्रसदृशमित्यर्थः । अहो इति आश्चर्ये । तदलिकं परयाऽन्यया आख्यया नाम्ना अलीकमिति रूपं वदन्ति बुधाः । 'गोधिर्ललाटालिके चालीकं श्रवणमस्त्रियाम्' ‡ इति नामकोशः । अलिकम् अलीकमित्युभयं नाम ललाटस्य । अलीकं मृषा च[23] । अलिकम् अलीकं मिथ्या जानीहि इत्यर्थः ॥ ९ ॥

न[24] भ्रूरियं पङ्कजलोचनायाः[25]-
श्चकास्ति शृङ्गाररसैकपात्रम् ।
भ्रूः[26] किन्त्वसौ साधुतरा प्रसूते
निर्बन्धनं[27] मोहविषद्रुमस्य ॥ ६ ॥

पङ्कजलोचनायाः[28] कमलाक्ष्याः इयं भ्रूः न चकास्ति न शोभते । कथंभूता भ्रूः । शृङ्गाररसैकपात्रं शृङ्गाररसस्य एकमद्वितीयं पात्रं स्थानम् । अजहल्लिङ्गत्वात् नपुंसकत्वम् । किन्तु असौ भ्रूः साधुतरा अतिशयेन साध्वी साधुतरा, तरतमेति पुंवद्भावः, श्रेष्ठतरा भूः भूमिः । सा मोहविषद्रुमस्य मोह एव विषद्रुमः तस्य निर्बन्धनम्[29] आविर्भावं प्रसूते उत्पादयति । भ्रूः भूः कथमिति प्रश्ने सा प्रसिद्धा भ्रूः धुतरा धुतो गतो रेफो यस्या ईदृशी भ्रूः भूः भवति इत्यर्थः । इन्द्रवज्रा नाम[30] छन्दः[30] ॥ ६ ॥

× Omitted N.
22 कथं अलिकं A. ‡ Metrical consideration would show that the line should be read as 'गोधिर्ललाटालीके चालिकं श्रवणमस्त्रियाम्'
23 वच: B N. 24 This stanza occurs as No. 11 C D E.
25 ० लोचनानां D. 26 भ्रू: A B. 27 निर्वन्धनम् D N. 28 A adds अथ भ्रवर्णनम् before पङ्कज० 29 निर्बन्धनम् A 30 Omitted A.

[31][32]नवकुवलयदामश्यामलान् दृष्टिपातान्
कृतपरमदनाशान् विक्षिपत्यायताक्षी ।
इति वहसि मुदं किं मोहराजप्रयुक्तान्
प्रशमभटवधार्थं[33] विध्यमून् ऋष्टिपातान् ॥ ७ ॥

[34]आयताक्षी आयते विस्तीर्णे अक्षिणी यस्याः सा एवंविधा मामुद्दिश्य दृष्टिपातान् कटाक्षान् विक्षिपति प्रयुङ्क्ते । किंविशिष्टान् दृष्टिपातान् । नवकुवलयदामश्यामलान् नवानि यानि कुवलयानि तेषां दाम[35] माला तद्वत् श्यामलाः कृष्णाः तान् श्यामलान् । पुनः किंविशिष्टान् दृष्टिपातान् । कृतपरमदनाशान् कृतः परमदस्य नाशो यैस्तान् । इति मुदं[36] किं वहसि प्राप्नोषि । अमून् दृष्टिपातान् प्रशमभटवधार्थं प्रशमः शान्तिभावः स एव भटः तस्य वधार्थं मोहराजप्रयुक्तान् मोह एव राजा मोहराजः 'राजाहःसखिभ्यष्टच्' (अष्टा० ५-४-९१) समासान्तः, तेन प्रयुक्तान् ऋष्टिपातान् तरवारिपातान् 'तरवारिरपि द्वौ च ऋष्टिरिष्टी अखण्डकौ' इति नामकोशः । विद्धि जानीहि । दृष्टिपातान् ऋष्टिपातान् जानीहि । तत् कथम् । कृतपरमदनाशान् कृतः परमः सर्वात्मना दस्य दकारस्य नाशो यत्र ते कृतपरमदनाशाः तान् । दृष्टिपातशब्दे दकारनाशे ऋष्टिपात इति स्यादेव इत्यर्थः[37] । मालती[38] नाम[38] छन्दः[38] ॥ ७ ॥

[39]तस्याः कोपपदं यदाननमहोरात्रं स्मरन्नात्मनः
संतापं वितनोषि काननमहो[40] ज्ञात्वा सखे तत् त्यजेः[41] ।

---

31 This stanza occurs as No.10 C D E.
32 मयि कुव० C D E. Nn. 33 ० वधार्थे B. 34 A reads अथ नेत्रवर्णम् before आयताक्षी. 35 A omits from माला तद्वत् up to ऋष्टिपात इति । 36 मुद हर्षे N. 37 Omitted B. N. 38 Omitted A. 39 This stanza occurs as No.6 CDE. 40 ०मिति CDE
41 त्यज E.

एतस्मिन्[४२] वसता[४३] मनोभवमहासर्पेण दष्टः पुमान्
कार्याकार्यविवेकशून्यहृदयः कस्को[४४] न संजायते ॥ ८ ॥

[४५]हे सखे तस्याः स्त्रियाः यदाननं मुखम् अहोरात्रं स्मरन् स्मृतिविषयं कुर्वन् त्वम् आत्मनः स्वस्य संतापं वितनोषि विस्तारयसि। कथंभूतमाननम्। कोपपदम् कोपस्य पदं स्थानं तत् आननम्[४६]। अहो इति खेदे। काननं वनं ज्ञात्वा त्वं त्यजेः। एतस्मिन् कानने वसता स्थितिं[४७] कुर्वता। मनोभवमहासर्पेण मनोभवः कामः स एव महासर्पः तेन। पुमान् दष्टः[४८] सन् कस्कः 'सर्वस्य द्वे' (अष्टा० ८-१-१) इति द्वित्वम्, कस्कादित्वात् + सत्वम्। कार्याकार्यविवेक-शून्यहृदयः कार्यं चाकार्यं च कार्याकार्ये तयोर्विवेकः तेन शून्यं हृदयं यस्य स तथा। न संजॅायते[४९]। सर्पविषेण मूर्छितः* पुमान् शून्यहृदयो भवति, अयं तु महासर्पेण दष्टः तस्य किं वाच्यम्। आननं काननं कथमिति प्रश्ने। [५०]आननं कोपपदं कः ककार उपपदं यस्य तदाननं† काननं स्यादेवेत्यर्थः ॥ ८ ॥

[५१]साकारमालोक्य मुखं तरुण्याः
किं मुग्धबुद्धे मुदमादधासि ।
इदं हि चित्तभ्रमनाटकस्य
विचक्षणैरामुखमाचचक्षे ॥ ९ ॥

[५२]हे मुग्ध[५३]बुद्धे मुग्धा बुद्धिर्यस्य तत्संबोधनम्। तरुण्या मुखमालोक्य किं मुदं हर्षमादधासि धारयसि। कथंभूतं मुखम्। साकारम् आकारेण[५३] सह वर्तमानं

---

42 येनास्मिन् C D E Nn. 43 वसतौ D. 44 कः को E. कः कोऽत्र नो जायते Nn. 45 A reads अथ मुखवर्णनम् before हे सखे. 46 Omitted B. 47 स्थितं A 48 दष्टः A + cf. कस्कादिषु च। (अष्टा०८·३·४८). 49 Omitted B. * मूछितो यथा A B. 50 After प्रश्ने A reads आननं स्यादेवेत्यर्थः ॥८। † तदा N. 51 This stanza occurs as No.7 CDE. 52 A reads पुनर्मुखवर्णनम् before हे मुग्धबुद्धे. 53 All words and letters between मुग्ध ""and ""कारेण सह omitted A.

साकारं सुन्दरमित्यर्थः । हि निश्चितम् । इदं मुखं विचक्षणैः विद्वद्भिः । चित्तभ्रम-नाटकस्य चित्तभ्रम[54] एव नाटकं[55] तस्य आमुखम् आद्यारम्भम् । आचचक्षे ऊचे× । आचचक्षे[56] इत्यत्र कर्मणि लिट् । मुखमामुखं स्थितम् । साकारम् आकारेण[57] सह वर्तमानं मुखमामुखं स्यादित्यर्थः ॥ ९ ॥

[58]कामज्वरातुरमते तव सर्वदास्यं
वामभ्रुवां यदि कथंचिदवाप्तुमिच्छा ।
यत्नं विनाप्यखिलजन्मपरम्परासु[59]
तज्जातमेव भवतो ननु सर्वदास्यम् ॥ १० ॥

हे कामज्वरातुरमते कामज्वरेण आतुरा मतिर्यस्य तत्संबोधनं हे कामज्वरातुरमते । सर्वदा सर्वस्मिन् काले । यदि तव[60] । वामभ्रुवां स्त्रीणाम् । आस्यं मुखम् । कथंचित् केनापि प्रकारेण । अवाप्तुं[61] प्राप्तुमिच्छा वर्तते । तदा ननु निश्चितं यत्नं विनापि अखिलजन्मपरम्परासु जन्मनः परम्पराः श्रेणयः अखिला या जन्मपरम्परास्तासु । भवतः तव सर्वदास्यं दासस्य भावो दास्यं सर्वेषां‡ दास्यं सर्वदास्यं सर्वेषां भृत्यत्वं जातमेव । स्त्रीमुखदत्तचित्तस्य तव सर्वजनानां दासत्वं जातमेव । अत्र पद्ये उभयत्र सर्वदास्यमिति पदस्य भिन्नार्थत्वमेव चित्रम्* ॥ १० ॥

[62]तस्याः साधुरदं विलोक्य वदनं यः संश्रयत्यञ्जसा
मुक्त्वा[63] मुक्तिपथं हहा प्रविशति[64] भ्रान्त्या स दुर्गं वनम् ।

---

54 चित्त एव भ्रमनाटकस्त आमुखम् A. 55 नाटकस्तस्य B. N. × Omitted N. 56 Omitted B. N. 57 आकारअक्षरेण सह A. 58 This stanza occurs as No. 9 CDE. 59 °प्यखिलविघ्न° D. Nn. 60 Omitted A. 61 आप्तुं A. ‡ सर्वेषां दास्यं सर्वदास्य Omitted N. * N. adds वसन्ततिलका नामच्छन्दः । 62 This stanza occurs as No. 8 C D E. 63 मुक्ता A. 64 प्रजगति A.

+ तच्चात्यन्तमचारुबद्धवसतिर्येनात्र रागादिभि-
श्चौरैर्धर्मधनापहारकरणात् कष्टं न किं[६५] प्राप्यते* ॥ ११ ॥

[६६]यः पुमान् तस्याः स्त्रिया वदनं मुखं साधुरदं साधवः समीचीना
रदा [६७]दन्ता यस्मिन् तत् तथा। विलोक्य अञ्जसा वेगेन संश्रयति आश्रयति।
स [६८]पुमान् हहा इति खेदे। मुक्तिपथं मुक्तिमार्गं मुक्त्वा[६९] भ्रान्त्या भ्रमेण दुर्गं १
दुःखेन गमनार्हं वनं प्रविशति। तद्वनम् अत्यन्तम् अन्तमतिक्रान्तम् अप्रमाण-
मित्यर्थः। कथंभूतः सः। अचारुबद्धवसतिः न चारुरचारुः बद्धा वसतिर्येन सः।
येन वनं प्रविशता पुरुषेण अत्र वने कष्टं [७०]किं न प्राप्यते। कस्मात्। रागा- ६
दिभिश्चौरैः धर्मधनापहारकरणात् धर्म एव धनं धर्मधनं तस्यापहारः हरणं तस्य
करणं तस्मात्। चौरा हि धनमपहृत्य वनं प्रविशन्ति। ततः‡ कष्टं स्पष्टमेव।
तत्र वदनं कथं वनमिति प्रश्ने। यः साधुः अदं न विद्यते दकारो यस्मिन् ९
तत् अदं दकाररहितं वदनं वनं स्यादेवेत्यर्थः†† ॥ ११ ॥

[७१]यियाससि भवोदधेर्यदि तटं तदेणीदृशा-
मधीनमधरं धरं परिहरेः परं दूरतः।
÷ इहास्फलनतोऽन्यथा विषादवासनानौस्तव
व्रजिष्यति विशीर्णतां न भविता ततो वाञ्छितम् ॥१२॥

[७२]हे पुमन् यदि त्वं भवोदधेः संसारसमुद्रस्य तटं पारं यियाससि यातु-
मिच्छसि यातेः सन्नन्तान्मध्यमपुरुषैकवचनरूपम्। तदा एणीदृशां एणी हरिणी
तस्या [७३]दृशाविव दृशौ यासां ता एणीदृशः तासाम्। अधरं धरं पर्वतं दूरतो ३

+ यत्रात्यन्तमचारु° N n. 65 कः C D E. * प्रापितः N n.
66 A reads अथ दन्तवर्णनम् before यः पुमान्. 67 Omitted B N.
68 Omitted A. 69 मुक्ता A. 70 तं प्राप्यते A. ‡ तदा N
†† स्यादेव N. 71 This verse occurs as No. 5 C D E.
÷ इह स्ख° N. 72 A reads अथ अधरवर्णनम् before हे पुमन्
73 दृशा इव दृशौ B N.

दूरात् एव त्वं परिहरेः । किंभूतमधरम् । अहीनं परिपूर्णममृतादिना । अन्यथा यदि न परिहरसि ×इह पर्वते आस्फलनतः संघट्टात् तव विशदवासना निर्मलश्रद्धा÷ सैव नौः विशीर्णतां भग्नतां‡ व्रजिष्यति । ततः तव वाञ्छितं न भविता न भविष्यति । यथा समुद्रमध्ये पर्वतास्फलनात् नावि भग्नायां वाञ्छितं न भवेत्तथा इत्यर्थः । अधरं धरं कथमिति प्रश्ने उत्तरम् । अहीनम् एन अकारेण हीनं अधरं धरं स्यादेवेति । 'सानुमान् पर्वतो धरः' [74]इति कोशः । पृथ्वीगुरुनाम छन्दः ॥ १२ ।

न भातीदं भ्रातः स्फुरदरुणरत्नौघकिरण-
प्रतानं तन्वङ्ग्यास्तरलतरलं कुण्डलयुगम् ।
[75]इमं दग्धुं पुंसामिह विरहसंयोग[76]दशयो-
र्ज्वलच्छोकानङ्ग[77]ज्वलनयुगिदं[78] कुण्डयुगलम् ॥ १३ ॥

[79]हे भ्रातः तन्वङ्ग्याः कृशाङ्ग्याः इदं कुण्डलयुगं कुण्डलस्य कर्णाभरणस्य युगं न भाति न शोभते । कथंभूतं कुण्डलयुगम् । स्फुरदरुणरत्नौघकिरणप्रतानं स्फुरन्तो देदीप्यमाना ये अरुणरत्नौघा रक्तरत्नसमूहाः तेषां ये किरणाः तेषां प्रतानं समूहो यस्मिंस्तत् । पुनः कथंभूतं कुण्डलयुगम् । तरलतरलं तरलाच्चञ्चलात् तरल चञ्चलतरमित्यर्थः । इदं कुण्डयुगलं * वर्तते । कथंभूतं कुण्डयुगलम् । विरहसंयोगदशयोः स्त्रीपुंसयोः संयोगाभावाद्विरहोत्पत्तिः विरहश्च संयोगश्च विरहसंयोगौ तयोर्दशे अवस्थे[81] तयोः[81] शोकानङ्गज्वलनयुक् शोकश्च

× तर्हि N. ÷ निर्मलवासना N. ‡ भङ्गतां N. 74 B N. add after धरः 'धरः शैलस्तथोदय'. 75 अहं मन्ये पुंसा० E. 76 °संभोग° A. 77 °नङ्गोज्व° B. 78 युगदं D E. 79 A reads अथ कुण्डलवर्णनं before हे भ्रातः. * This sentence is omitted N.; while A B read कुण्डलयुगलं which is evidently incorrect. 80 युगलं A. 81 अवस्थितयोः A.

अनङ्गज्वलनश्च शोकानङ्गज्वलनौ ताभ्यां युक् । विरहे शोकाविर्भावः संयोगे ९
कामाग्नेराविर्भाव इत्यर्थः । कुण्ड[८२]युगलं किं कुर्वन् । इह संसारे पुंसां पुरुषाणां दमसुपशमं द[८३]ग्धुं एवं ज्वलत् । कुण्डलयुगं कुण्[८४]डयुगलं कथं तत्रोच्यते । ‡तरल-तरश्चञ्चलतरः लो लकारो यस्मिन् । कुण्डशद्वा[८५]ल्लकारे कुण्डलयुगं × चञ्चलत्वात् १२
युगशद्वात् परे लकारे कुण्डयुगलं स्यादित्यर्थः । शिखरिणी [८६]नाम [८६]छन्दः ॥ १३ ॥

> ताडङ्कं सस्पृहं तस्याः पश्यन् मू[८७]ढः परे भवे ।
> नरो नरकपालेभ्यस्ताडं कं न सहिष्यते[८८] ॥ १४ ॥

[८९]मूढो नरः तस्याः स्त्रियाः सस्पृहं साभिलाषं यथा स्यात् तथा ताडङ्कं कर्णभूषणं पश्यन् परे भवे आगामिभवे नरकपालेभ्यः[९०] नरकान् पालयन्तीति नरकपालाः तेभ्यः परमधार्मिकेभ्यः कं ताडं ‘ ताडनं ताड आघातः ’ तं कं न ३
सहिष्यते । अपि तु सर्वं सहिष्यते । अनुष्टुप् छन्[९१]दः ॥ १४ ॥

> सारं गलं यै[९२]मरविन्दविलोचनाना-
> मालोक्य चेतसि मुदं कलयन्ति मूढाः ।
> हा[९३] निश्चितं रचितमुक्तिपुरप्रवेश-
> व्यासेधमर्गलममुं न विचारयन्ति ॥ १५ ॥

---

82 कुण्डलयुगलं A N. 83 दुग्धं पयं ज्वलत् A; दुग्धं पयः ज्वलत् B. N. 84 कुण्डलयुगलं A. ‡ तरलतरलश्च ° N. 85 So A, B, N. We, however, expect to read कुण्डशब्दात् परे लकारे (cf. युगशब्दात् परे लकारे immediately after this). × कुण्डलयुगस्य N. 86 This whole sentence omitted A. 87 मूढ A. B D. 88 सहिष्यति AE. 89 मूढाः नराः B. 90 B adds पालेभ्यः after नरकपालेभ्यः 91 This whole sentence omitted A, 92 यदरविन्द० C DE Nn. 93 तन्निश्चितं C D E. Nn.

मूढा मूर्खा नराः अरविन्दविलोचनानां कमलनयनानां स्त्रीणां यं सारं श्रेष्ठं गलं निगरणं विलोक्य चेतसि मुदं हर्षं कलयन्ति प्राप्नुवन्ति । हा इति खेदे[94] । निश्चितं नियमेन अमुं* गलं अर्गलं न विचारयन्ति । कथंभूतमर्गलम् । रचितमुक्तिपुरप्रवेशव्यासेधं रचितो[95] विहितो मुक्तिनगरप्रवेशस्य व्यासेधो निषेधो येन स तं रचितमुक्तिपुरप्रवेशव्यासेधम् । गलमर्गलं त्वित्थम् । सारं अरा अरशब्देन सह वर्तते यः स[96] सारः तं सारम् । अरसहितो गलः अर्गलः स्यादित्यर्थः ॥१९॥

अलं[97] प्राप्य स्पर्शं कुचकलशयोः पङ्कजदृशां
　　परां प्रीतिं भ्रातः कलयसि सुधामग्न[98] इव किम् ।
अवस्कन्दं धर्मक्षितिपकटके दातुमनसा
　　प्रयुक्तं जानीयाः कलुषवरटेन[99] स्पशमिमम्[100] ॥ १६ ॥

[101]पङ्कजदृशां कमलनयनानां स्त्रीणां कुचकलशयोः स्तनयोः अलमत्यर्थं स्पर्शं प्राप्य हे भ्रातः किं परां उत्कृष्टां प्रीतिं कलयसि प्राप्नोषि । क इव । सुधामग्न इव अमृते कृतमज्जन इव । इमं स्पर्शं कलुषवरटेन कलुषं पापं तदेव वरटो भिल्लराजेन प्रयुक्तं प्रेरितं स्पशं हेरिकं त्वं जानीयाः । कथंभूतेन कलुषवरटेन । धर्मक्षितिपकटके धर्म एव क्षितिपः राजा तस्य कटके सैन्ये अवस्कन्दं प्रहरणं दातुमनसा प्रहरणं कर्तुमनसेत्यर्थः । स्पर्शं स्पशं कथमिति । अलं रलयोश्चैकत्वस्मरणात् अरं नास्ति रो रेफो यत्र तं अरम् । रेफरहितः× स्पर्शः स्पशः स्यादित्यर्थः ॥ १६ ॥

[102]पीनोन्नतं स्तनतटं मृगलोचनाया
　　आलोकसे नरहितं यदपूर्वमेतत् ।

---

94 Omitted A. * इमं A B. 95 स्थितो A. 96 संसारः so both A B. 97 अरं C D E Nn. 98 मुधा मुग्ध C E. 99 °नरपेन E ; चरटेन Nn 100 °ममुम् C D E. 101 A reads अथ कुचवर्णनम् before पङ्कजदृशां. × रेफरहितस्पर्शः स्पशः N. 102 C D E Nn. read the first half as पीनोन्नतं नरहितं यदपूर्वमेतदालोकसे स्तनतटं मृगलोचनायाः ।

मोहान्धकारनिकरक्षयकारणस्य
[103]विद्यास्तदस्ततटमेव विवेकभानोः ॥ १७ ॥

यत् मृगलोचनाया हरिणाक्ष्या स्त्रिया एतत् स्तनतटं कुचद्वन्द्वं पीनोन्नतं पीनं च तदु[104]न्नतं च पीनोन्नतम्। पुनः नरहितं नरेभ्यो हितम्। पुनः अपूर्वं प्रतिक्षणं चमत्कारहेतुत्वात्। त्वमालोकसे पश्यसि। तत् स्तनतटं विवेकभानोः
[105]विवेकसूर्यस्य अस्ततटं+ विद्याः। अत्र ज्ञानसूर्योऽस्तमेष्यतीत्यर्थः। कथंभूतस्य ३
विवेकभानोः। मोहान्धकारनिकरक्षयकारणस्य मोह एवान्धकारस्तस्य यो निकरः
समूहस्तस्य क्षयकारणं तस्य मोहान्धकारनिकरक्षयकारणस्य। स्तनतटं[106] विशे- ६
षणद्वयेन अस्ततटं साधयति। नरहितं नेन नकारेण रहितं पुनः अपूर्वं अकारः पूर्वो यस्य तत् अपूर्वं एतादृशं स्तनतटम् अस्ततटं स्यादेवेत्यर्थः ॥ १७ ॥

[107]कन्दर्पद्विपकुम्भचारुणि कुचद्वन्द्वे मृगाक्ष्या मया
न्यस्तो हस्त इति प्रमोदमदिरामाद्यन्मना मा स्म भूः।
किन्त्वाजन्म यदर्जितं बहुविधामभ्यस्य कष्टक्रियां
हस्तोऽयं[108] सुकृतस्य तस्य सहसादायीति संचिन्तयेः ॥ १८ ॥

मया मृगाक्ष्याः स्त्रियाः कुचद्वन्द्वे स्तनयुगमे हस्तो न्यस्तः करः स्थापितः। कथंभूते कुचद्वन्द्वे। कन्दर्पद्विपकुम्भचारुणि कन्दर्प एव द्विपः तस्य

---

103 विद्या A B C D. 104 उन्नतं A. 105 A is very corrupt for two lines from here. See remarks on A in Introduction. + त्वं N. 106 स्तनतटमिति So A B N. 107 This stanza occurs as No. 36 C D E. In the place of this stanza C D E Nn. have the following stanza:--

एतस्या युवतेः पयोधरयुगं बल्गन्महात्मन्निदं
चक्रे योधयुगं विरञ्चिरपरं विश्वापकारोद्यतः ॥
कुर्वद्धर्मगणेष्वयोगमनतिक्रामन्निजां स्तब्धतां
यद् दूरादपि कल्पयत्युपशमप्राणानोदं नृणाम् ॥

In this stanza अपरं पयोधरयुगम् = (i) अन्यत् पयोधरयुगम्; and (ii) पकाररेफरहितं पयोधरयुगं i. e. योधयुगम् (as is explained in the gloss in all the MSS.). 108 यः A.

[109]कुम्भः गण्डस्थलं तद्वत् चारु मनोज्ञं तस्मिन् [110]कन्दर्पद्विपकुम्भचारुणि । इति हेतोः प्रमोदमदिरामाद्यन्मनाः प्रकृष्टो यो मोदः[111] स एव मदिरा तया माद्यन्मनो यस्य स एतादृशः त्वं मा स्म भूः ।'माङि लुङ्' (अष्टा० ३·३·१७५) इति लुङ् । 'न माङ्योगे' (अष्टा० ६·४·७४) इत्यडागमाभावः । किन्तु बहुविधां तपोऽनुष्ठानादिरूपां कष्टक्रियां कष्टसाध्या क्रिया कष्टक्रिया ताम् ¶ । अभ्यस्य अभ्यासं कृत्वा आजन्म यदर्जितं [112]जन्म मर्यादीकृत्य यत् सुकृतमर्जितं तस्य सुकृतस्य त्वया अयं हस्तः अदायि दत्तः । यथा ‡ कस्यचिदाजिगमिषोः हस्तप्रदानं संज्ञया निषेधयति तथा त्वया हस्त[113]दानेन सुकृतं निषिद्धमिति * संचिन्तयेः विचारयेरित्यर्थः । अत्र पद्ये हस्तो न्यस्तः सुकृतस्य हस्तोऽदायीति चित्रकृत् ॥ १८ ॥

कण्ठोपकण्ठे लुलितं विभावयेः[114]
भुजं युवत्या भुजगं गराजितम् ।
एतस्य संस्पर्शवशादपि क्षणा-
दशेषचैतन्यमुपैति संक्षयम् ॥ १९ ॥

कण्ठोपकण्ठे लुलितं कण्ठस्य गलस्य समीपे कण्ठोपकण्ठे लुलितं वलितं युवत्याः स्त्रियाः[115] भुजं बाहुं भुजगं सर्पं त्वं विभावयेः जानीयाः । कथंभूतं भुजगम् । गराजितं गरेण विषेण अजितो गराजितस्तम् । एतस्य भुजगस्य [116]संस्पर्शवशात् स्पर्शमात्रेणापि अशेषं समस्तं चैतन्यं चेतनाया भावः क्षणात् संक्षयं नाशमुपैति प्राप्नोति । यथा भुजग[117]स्पर्शात् चैतन्यं याति तथा युवत्या भुजस्पर्शादेव चैतन्य-नाशः स्यादित्यर्थः । भुजं भुजगं कथं स्यादिति प्रश्ने । भुजं गराजितं गेन गकारेण × राजितं भुजं भुजगं स्यादित्यर्थः । [118]इन्द्रवंशा [118]छन्दः ॥ १९ ॥

---

109 Omitted B; कुम्भस्थलं कुम्भः A. 110 कन्दर्प एव द्विपः गज A, कन्दर्पः B. 111 मोहः A.
¶ N adds कष्टक्रियाम्. 112 जन्मनो B N. ‡ कस्य आजि° N.
113 Omitted B. * N adds त्वं. 114 विभावये ABC, विभावय E.
115 Omitted A. 116 Omitted A. 117 भुजगस्य स्पर्शात् A.
× गकाराक्षरेण AB. 118 Omitted A, इन्द्रवंशा नाम च्छन्दः N.

कण्ठावसक्ते कुपिते नवाहौ
वरं बहिः प्राणहरे[119] प्रमोदः[120] ।
विध्वस्तधर्मान्तरजीविते [121]नुः
स्त्रैणेन[122] बाहौ विदुषां स युक्तः ॥ २० ॥

नुः पुरुषस्य नवाहौ नवश्चासौ अहिश्च नवाहिः तस्मिन् नवीनसर्पे
कण्ठावसक्ते कण्ठस्थापिते । वरं श्रेष्ठम् । कथंभूते नवाहौ । कुपिते क्रुद्धे ।
पुनः कथंभूते नवाहौ । बहिःप्राणहरे[123] बहिःप्राणान् हरतीति बहिःप्राणहरः ३
तस्मिन् बाह्यप्राणनाशके । स्त्रैणे स्त्रीणामयं स्त्रैणः तस्मिन् । 'स्त्रीपुंसाभ्यां
नञ्स्नञौ ' (अष्टा० ४-१-८७) इति नञ्प्रत्यये आदिवृद्धौ णत्वे स्त्रैणशब्द-
सिद्धिः । बाहौ भुजे कण्ठावसक्ते सति यः प्रमोदो हर्षः स विदुषां पण्डितानां ६
युक्तो न । कथंभूते बाहौ । विध्वस्तधर्मान्तरजीविते विध्वस्तं नाशितं धर्म
एव अन्तरजीवितं येन तस्मिन् अन्तरप्राणनाशके इत्यर्थः ॥ अहिस्तु कण्ठा-
वसक्तः सन् बहिःप्राणं* नाशयति । स्त्रीणां बाहुः कण्ठावसक्तः सन् अन्तर- ९
प्राणनाशं विधत्ते । अतः सर्पादप्यधिकतरदुःखदं स्त्रीकृतालिङ्गनमित्यर्थः । अत्र
नवाहौ इति उभयत्र चित्रकृत् । वबयोरभेदस्तु [124]आलङ्कारिकैरिष्ट एव ॥ २० ॥

कोऽयं विवेकस्तव यन्नतभ्रुवां
दोषावगूढः प्रमदं विगाहसे ।
[125]यतः स्मरातङ्कपरीतचेतसां
किं सुन्दरासुन्दरयोर्विवेचनम् ॥ २१ ॥

---

119 प्राणचरप्रमोदः E. 120 प्रमोदम् B. 121 न B; तु Nn.
122 स्त्रैणे प्रयुक्तो विदुषां न युक्तः A. 123 Omitted A. * बहिःप्राणान् N.
124 अलङ्कारकैः A; आलङ्कारकैः B. 125 यद्वा CDENn.

हे साधो अयं तव कः विवेकः यत् नतभ्रुवां नते नम्रीभूते भ्रुवौ यासां ता नतभ्रुवः तासां स्त्रीणां दोषा बाहुना अवगूढः आलिङ्गितः सन् त्वं प्रमदं प्रकृष्ट[×] मदं विगाहसे प्राप्नोषीत्यर्थः। यतो यस्मात् स्मरातङ्कपरीतचेतसां स्मरः कामः स एव आतङ्को रोगः तेन परीतं व्याप्तं चेतो येषां तेषां पुरुषाणां सुन्दरासुन्दरयोः समीचीनासमीचीनयोः किं विवेचनम् । अपस्मारादिरोगग्रस्तानां शुभाशुभे विवेको न भवतीति युक्तमेव। पक्षे दोषैरवगूढो दोषावगूढः विवेकदोषयुक्त इत्यर्थः ॥ २१ ॥

हंहो विलोक्य परमङ्गदमङ्गनाना-
मानन्दमुद्वहसि किं मदनान्धबुद्धे ।
सत्यं विवेकनिधनैकनिमित्तमेत[१२६]-
न्मेधाविनो हि परमं गदमुद्गृणन्ति ॥ २२ ॥

हंहो इति संबोधने। हे मदनान्धबुद्धे मदनेन कामेन अन्धीभूता बुद्धिर्यस्य तस्य संबोधनम्*। अङ्गनानां प्रधानमङ्गं यासां तासामङ्गनानां परमुत्कृ[१२७]ष्टं अङ्गदं केयूरं विलोक्य दृष्ट्वा आनन्दं किमुद्वहसि प्राप्नोषि। मेधाविनः पण्डिता एतत् अङ्गदं परमं उत्कृष्टं गदं रोगमुद्गृणन्ति प्रजल्पन्ति तत् सत्यम्। कथंभूतं गदम्। विवेकनिधनैकनिमित्तं विवेको ज्ञानं तस्य निधनस्य नाशस्य एकमद्वितीयं निमित्तं कारणम्। गदो हि निधनैकहेतुर्भवत्येव। अत्र पद्ये उभयत्र परमङ्गदमिति पदं भिन्नार्थत्वात् चित्रकृत् ॥ २२ ॥

[× प्रकृष्टमदं N. 126 °मेनं C Nn; °मेकं D (which originally appears to have read °मेनं and changed it later on), E.
* सम्बोधनं N. 127 परमोत्कृष्टं B, परम उत्कृष्ट A.

अयं जनो वलयभरं विलोकते
मृगीदृशामधिभुजवल्लि बालिशः ।
[128] न बुध्यते[129] सुकृतचमूं[130] जिगीषतः ।
समुद्यतं बलभरमेनमेनसः ॥ २३ ॥

अयं प्रत्यक्षंगतो[131] बालिशो मूर्खो जनः मृगीदृशां स्त्रीणां वलयभरं वलयानां भरः तम् अधिभुजवल्लि भुजावेव वल्लिः तस्यामिति अधिभुजवल्लि । विभक्त्यर्थेऽव्ययीभावः[132] । भुजलतायामित्यर्थः । विलोकते पश्यति । एनं वलयभरम् । एनसः पापस्य समुद्यतं सावधानीभूतं बलभरं सेनासमूहं न बुध्यते । कथंभूतस्य एनसः । सुकृतचमूं सुकृतस्य शीलादेः चमूः सेना तां जिगीषतः जेतुमिच्छतः । कथं वलयभरं बलभरमिति[133] तत्रोत्तरम्[×] । कथंभूतं वलयभरम् । अयम् न विद्यते यो यकारो[134] यस्मिन् स अयः तमयं यकाररहितमित्यर्थः । इदं[135] रुचिरा छन्दः ॥ २३ ॥

ये दृक्पथे तव पतन्ति नितम्बिनीनां
कान्ताः[136] कृशा जडिमपल्लवनप्रवीणाः[137] ।
नो वेत्सि[138] तान् किमपवर्गपुरप्रयाण-
प्रत्यूहकारणतया करकानवश्यम्[139] ॥ २४ ॥

---

128 C D E Nn. read the latter half of this stanza as:– जिगीषतः सुकृतचमूं समुद्यतं न बुध्यते बलभरमेनमेनसः ॥ 129 बुध्यसे C. 130 सुकृतचमूः A. 131 प्रत्यक्षं गतो A. 132 विभक्तेऽर्थे A. 133 बलभरम् omitted B. × तत्रोच्यते N. 134 Omitted A. 135 This whole sentence omitted A; N reads:– रुचिरा नाम च्छन्दः । 136 कान्ताकरा A B C. 137 °पल्लविनः B C. D also originally read पल्लविनः which the scribe himself seems to have corrected into पल्लवन by scratching out the विसर्ग and the इ mark with the same ink. 138 विस्मितान् E. 139 करकरवस्यम् E.

[140]तव दृक्पथे दृष्टिमार्गे नितम्बिनीनां स्त्रीणां कान्ता मनोज्ञाः करा हस्ताः । नितम्बिनीनामिति सम्बन्धे[141] बहुत्वात् करा इति बहुत्वम् । पतन्ति अवलोकनतां गच्छन्ति । [142]कथंभूताः कराः । जडिमपल्लवनप्रवीणाः जडिम्नः जडतायाः यत् पल्लवनं प्रकटीकरणं तत्र प्रवीणाः चतुराः[142a] तान् करान् अवश्यं निश्चयेन करकान् घनोपलान् किं नो वेत्सि न जानासि । कया । अपवर्गपुरप्रयाण-प्रत्यूहकारणतया । अपवर्गो मोक्षः स एव पुरं नगरं तस्मिन् प्रयाणं [143]गमनं तत्र यः प्रत्यूहो विघ्नं तत्र यत् कारणं निदानं तस्य भावः तत्ता तया अपवर्गपुर-प्रयाणप्रत्यूहकारणतया । गमनकाले करकवृष्टिः स्वेष्टसिद्धौ विघ्नकारणं प्रसिद्धमेव । उक्तं च वसन्तराजशाकुने—

'क्षीणचन्द्रतिथिदुःसहा[144]निलं दूषितं धरणिकम्पनादिना ।
*पर्ववज्जलदसंकुलाम्बरं वर्जयेच्छकुनदर्शने दिनम् ॥' इति
(पोदकीरुत, अधिवासनप्रकरण St. 12)

अकाल[145]वृष्टिर्गमने निषिद्धा । करकपतनं तु अवश्यमेव× वर्ज्यम् । करान् करकान् कथमिति प्रश्ने[146] उत्तरम् । कथंभूताः कराः । कान्ताः+ ककारोऽन्ते येषां ते कान्ताः ककारान्ता इत्यर्थः । तादृशाः कराः करका भवन्त्येवेत्यर्थः ॥ २४ ॥

---

140 A reads अथ करवर्णनम् before तव दृक्पथे. 141 सम्बन्धबहुत्वात् A. 142 Here several sentences upto कथंभूताः कराः towards the end of the commentary on this stanza are missing in A. This is evidently caused by the aberration of the scribe's eye. 142a Omitted A. 143 Omitted A. 144 दुःसहातिचन्द्रनिलं (which evidently is corrupt for दुःसहानिलं) A, °दुःसहानलं BN. * पूर्ण° N. A MS. of वसन्तराजशाकुन in my possession reads °दुःसहानिलं and पूर्णवज्जलद°. 145 °दृष्टिः B. × अवश्यं वर्ज्यमेव N. 146 प्रश्नोत्तरम् B N; + ककारोऽन्ते येषां ते कान्ताः omitted N.

नीव्याप्तमस्या हरिणेक्षणाया
यं वीक्ष्य हारं हृदि हर्षमेषि ।
विवेकपङ्केरुहकाननस्य
तमेव नीहारमुदाहरन्ति ॥ २५ ॥

[१४७]अस्या हरिणेक्षणाया हरिणस्य ईक्षणमिव ईक्षणं यस्यास्तस्याः । यं हारं वीक्ष्य त्वं हृदि हृदये हर्षं प्रमोदमेषि[१४८] प्राप्नोषि । कथंभूतं हारम् । नीव्याप्तं नीवीं वसनग्रन्थिं आप्तं प्राप्तं नीव्याप्तं नीवीपर्यन्तं लम्बायमानमित्यर्थः । बुधाः तं हारमेव विवेकपङ्केरुहकाननस्य विवेक एव पङ्केरुहं कमलं तस्य काननं वनं तस्य नीहारं हिमं उदाहरन्ति कथयन्ति । नीहारो यथा कमलकाननस्य दाहकस्तथायं हारः । हृदि[१४९] हारवर्णनं विवेकनाशकमित्यर्थः । हारं कथं नीहारमिति* । तत्रोच्यते । कथंभूतं हारम् । नीव्याप्तं नीशब्देन[१५०] व्याप्तं नीव्याप्तम् । एतादृशं हारं नीहारं स्यादित्यर्थः‡ ॥ २५ ॥

विलोक्य किं सुन्दरमङ्गनोदरं
करोषि[१५१] मोहं मदनज्वरातुर[१५२] ।
[१५३]किमीक्षसे दुर्गतिपातसंभवं
भवान्तरे भाविनमङ्ग नो दरम् ॥ २६ ॥

हे [१५४]मदनज्वरातुर मदनः कामः स एव ज्वरः तेन आतुरः तस्य संबोधनम् । सुन्दरं दर्शनार्हं अङ्गनोदरमङ्गनाया उदरं विलोक्य त्वं किं मोहं करोषि । अङ्गेत्यामन्त्रणे । भवान्तरे आगामिभवे भाविनं भवनशीलं दरं भयं

---

147 A reads अथ हृदयवर्णनम् before अस्याः हरिणेक्षणायाः. 148 Omitted B. 149 हृद्गतहार° A. * N adds प्रश्ने after इति. 150 A reads नीशब्दोव्याप्तम् (which might be corrupt for निशब्दव्याप्तम्). ‡ N omits इत्यर्थः. 151 मोदं D E. 152 °तुरः E. 153 नो ईक्षसे ABE N. 154 A reads अथ उदरवर्णनम् before हे मदन°.

किं नो ईक्षसे न विचारयसि[१५५] । कथं भूतं दरम्[१५६] । दुर्गतिपातसंभवम् दुर्गतिर्नरकादिः तस्यां यः[१५७] पातः पतनं तस्मिन् संभवः उत्पत्तिर्यस्य तम् । अत्र पूर्वमङ्गनोदरमिति समस्तं पदं परत्र अङ्ग नो दरम् इति पदविभागेनार्थव्युत्पादनं चित्रम् ॥ २६ ॥

स्फूर्जन्मनोभवभुजङ्गमपाशनाभी
नाभी कुरङ्गकदृशां दृशि यस्य लग्ना ॥
नाभीमयं जगदशेषमुदीक्षतेऽसौ[१५८]
यो[१५९] यत्र रज्यति स तन्मयमेव पश्येत् ॥ २७ ॥

[१६०]यस्य पुरुषस्य दृशि नेत्रे कुरङ्गकदृशां मृगनेत्राणां स्त्रीणां[१६१] नाभी शरीरावयवविशेषः लग्ना । कथंभूता नाभी । स्फूर्जन्मनोभवभुजङ्गमपाशनाभी स्फूर्जन् देदीप्यमानो यो मनोभवः कामः स एव भुजङ्गमः[१६२] सर्पः तस्य पाशार्थं नाभी कामसर्पस्थानमित्यर्थः । असौ पुमान् अशेषं समस्तं जगत् नाभीमयं अभीमयं निर्भयं[१६३] न ईक्षते[१६४] न निर्भयं जगदीक्षत इत्यर्थः । यः पुरुषः यत्र स्थाने रज्यति स पुमान् तन्मयं तद्रूपमेव पश्येत्[१६५] । नाभी दृशि लग्ना नाभीमयं जगत् पश्यतीति न चित्रम् । [१६६]नाभीमयमिति पदं चित्रकृत् ॥ २७ ॥

[१६७]जडोपयुक्तं जघनं मृगाक्ष्याः
समीक्ष्य[१६८] किं तोषभरं तनोषि ।
अमुं विशुद्धाध्यवसायहंस-
प्रवासहेतुं घनमेव विद्धि[१६९] ॥ २८ ॥

155 Omitted A. 156 उदरम् A. 157 तस्या B. 158 स C D Nn. 159 योऽन्यत्र D. 160 A reads अथ नाभिवर्णनम् before यस्य पुरुषस्य. 161 Omitted B. 162 मनोभवः कामः स एव again instead of भुजङ्गमः which is omitted. A. 163 Omitted A. 164 Omitted A 165 पश्यति BN. 166 नाभीनाभीमयं BN. 167 जलोपयुक्तं CDENn 168 संवीक्ष्य C D E Nn. 169 विन्द्याः B.

[170]मृगाक्ष्याः स्त्रियाः जघनं समीक्ष्य दृष्ट्वा किं तोषभरं हर्षभरं तनोषि निस्तारयसि । कथंभूतं जघनम् । जडोपयुक्तं जडानां मूर्खाणामुपयुक्तं योग्यम् । अमुं जघनं घनमेव विद्याः[171] जानीयाः । कथंभूतं घनम् । विशुद्धाध्यवसाय-हंसप्रवासहेतुं विशुद्धो निर्मलो यः अध्यवसायः चित्ताभिप्रायः स एव हंसः तस्य यः प्रवासस्तस्य हेतुः कारणं तं विशुद्धाध्यवसायहंसप्रवासहेतुम् । घनागमे हंसा मानसे गच्छन्तीति प्रसिद्धम् । जघनं घनं कथम् । तत्राह[172] । जडोपयुक्तं जलयोश्चैक्येत्[173]वस्मरणात् जलोपयुक्तं जस्य जकारस्य लोपो नाशस्तेन युक्तं जकारं विना जघनं घनं[174] स्यात् ॥ २८ ॥

नितम्बमुल्लासिततापनोदं
दिदृक्षसे यत्× कमलेक्षणानाम् ।
सर्वात्मनात्यन्तकटुं विदित्वा
तं निम्बमेव[175] त्यज दूरतोऽपि ॥ २९ ॥

[176]कमलेक्षणानां कमलनयनानां यत्[177] नितम्बं पृष्ठभागं दिदृक्षसे द्रष्टुमिच्छसि । कथंभूतं नितम्बम् । उल्लासिततापनोदं उल्लासितः तापस्य नोदः प्रेरणं येन सः तम् । तं नितम्बं निम्बमेव अरिष्टं* विदित्वा दूरतोऽपि त्यज । कथंभूतं निम्बम् । सर्वात्मना पत्रफलपुष्पसमूहेन अत्यन्तकटुं अतिकटुकम् । नितम्बं कथं निम्बमिति‡ । तत्रोच्यते । कथंभूतं निम्बम् । उल्लासितता[178]पनोदम् उल्लासितः तस्य तकाराक्षरस्य अपनोदो नाशो यस्मिन् स$ तकारनाशेन++ नितम्बो निम्बः स्यादेवेत्यर्थः ॥ २९ ॥

---

170 A reads अथ जङ्घावर्णनं (=जघनवर्णनं ?) before मृगाक्ष्याः. 171 विन्द्याः B. 172 तत्राव B, तत्र A. 173 श्चैकत्व° B; जडयोश्लोकत्वस्मरणात् A. 174 Omitted A. × किं Nn. 175 A. मेवं° 176 A reads अथ नितम्बवर्णनम् before कमलेक्षणानाम्. 177 Omitted A; यं N. * रिष्टं N. ‡ N adds प्रश्ने before तत्रोच्यते । 178 Omitted A. $ N adds तम् after स. ++ °नाशे N.

नूनं नूपुरमेतदायतदृशो रागादिविद्वेषिणां
क्रीडार्थं पुरमित्यवेत्य न दृशा[१७९]ऽऽलोकनीयं क्वचित् ।
येनास्मिन् मुखमात्रचङ्गिमगुणैराकृष्य तैरुल्बणैर्
बद्धस्य प्रसभं चिरादपि सखे मुक्तिर्भवित्री न ते ॥३०॥

[१८०]नूनं निश्चितम् । आयतदृशः आयते विस्तीर्णे दृशौ यस्यास्तस्याः विशालनयनायाः एतत् नूपुरं चरणभूषणं रागादिविद्वेषिणां रागादिशत्रूणां क्रीडार्थं विनोदार्थं पुरं नगरमिति अवेत्य ज्ञात्वा त्वया क्वचित् कदापि दृशा नेत्रेण नालोकनीयं न द्रष्टव्यम् । शत्रुपुरं श्रेयोऽर्थिना पुरुषेण न विलोकनीयमित्यर्थः । हे सखे येन नूपुरेण अस्मिन् पुरे तैः प्रसिद्धैः मुखमात्रचङ्गिमगुणैः मुखमात्रे ये चङ्गिमाः श्रेष्ठा गुणाः तैः उल्बणैरुदारैः आकृष्य प्रसभं बलात्कारेण बद्धस्य ते तव चिरादपि चिरकालेनापि मुक्तिर्मोचनं न भावित्री । नूपुरं [१८१]पुरं कथमिति* । तत्रो[१८२]च्यते । कथंभूतं नूपुरम् । नूनं [१८३]नूशब्देन ऊनं नूशब्दरहितं नूपुरं पुरं भवतीति ॥ ३० ॥

या स्त्रीति नाम्ना बिभृते[१८४] शमाद्रौ
शस्त्री प्रबुद्धैरवबुध्यतां[१८५] सा ।
एनां[१८६] पुरस्कृत्य जगत्यनङ्ग-
भटो यतः पुण्यभटं भिनत्ति ॥ ३१ ॥

या स्त्रीति नाम्ना स्त्रीत्यभिधानेन बिभृते धारयति सा स्त्री प्रबुद्धैः ज्ञानिभिः शमाद्रौ उपशमादिधर्मकर्मणि* शस्त्री अमुक्तायुधं अमुक्ता††

179 व्यालोकनीयं E. 180 A reads अथ नूपुरवर्णनम् before नूनं. 181 Omitted A. * N adds प्रश्ने after इति. 182 A B N drop उच्यते and read तत्र along with कथं° etc. 183 नुशब्देन A. 184 °भिमता E. 185 °बध्यतां E. 186 एनं A, एवं B. * उपशमादिकर्मणि N. †† अमुक्तं शस्त्री°. 1

शस्त्रीप्रमुखमिति ‘ क्षुरी शस्त्री कृपाणिका ’ इति नामकोशः अवबुध्यतां ज्ञायताम् । यतो यस्मात् अनङ्गभटः कामसुभटः जगति संसारे एनां स्त्रीरूपां शस्त्रीं पुरस्कृत्य अग्रे कृत्वा पुण्यभटं धर्मसुभटं भिनत्ति भेदनं करोति । सुभटेन प्रतिसुभटं शस्त्र्या भेदनं विधीयते एव । स्त्रीति [187]शस्त्री कथम् । तत्रोच्यते ।¶ या स्त्री शं शकारमादौ बिभृते तदा स्त्री शस्त्री स्यादेवेत्यर्थः ॥ ३१ ॥

[188]येयं वधूरवसिता हृदये[189] प्रमोद-
सम्पा[190]दनव्यतिकरैकनिबन्धनं ते ।
सा दुर्गदुर्गतिपथेन जगन्निनीषोः
धूरेव मन्मथरथस्य विभावनीया[191] ॥ ३२ ॥

या इयं वधूः ते तव [192]हृदये प्रमोदसम्पादनव्यतिकरैकनिबन्धनं हृदये यः प्रमोदः तस्य सम्पादनमुत्पादनं तस्य यो व्यतिकरः समूहः तस्य निबन्धनं कारणं अवसिता प्राप्ता हृदयहर्षोत्पादनकारणं वधूरिति त्वया मन्यत इत्यर्थः । सा वधूः मन्मथरथस्य धूरेव युगमेव विभावनीया ज्ञातव्या । कथंभूतस्य मन्मथ-[193]रथस्य । जगत् कर्मतापन्नं दुर्गदुर्गतिपथेन दुर्गतेः नरकादिगतेः पन्थाः दुर्गति-पथः । ‘ ऋक्पूरब्धूःपथामानक्षे ’ (अष्टा. ५-४-७४) इति अप्रत्ययः[194] । दुर्गो यो दुर्गतिपथः तेन निनीषोः नेतुमिच्छोः । दुर्गतिमार्गेण[195] संसारं नेतुमिच्छतः कामरथस्य धूरस्ति न तु* वधूरित्यर्थः । वधूः धूः कथम् । तत्रोच्यते । वेन वकारेण सिता बद्धा वसिता, न वसिता अवसिता वकाररहिता [196]वधूः धूः[197] एव स्यादित्यर्थः ॥ ३२ ॥

---

187 कथं शस्त्री A, ¶ N adds शमादौ before या स्त्री. 188 यैषा CDENn. 189 हृदये° A B N. 190 °सम्मर्दन°. ? 191 विभावनीयाः D; विभावनीयम् E. 192 हृदये प्रमोद° A B N. 193 मन्मथस्य B. 194 This sentence omitted A. 195 दुर्गतिपथेन मार्गेण A. * तु omitted N. 196 Omitted A. 197 Omitted B.

प्रीतिं तन्वन्त्यनलसदृशो यास्[198]तरुण्यस्तवैता
देहद्युत्या कनकनिभया द्योतिताशा[199] विवेकिन् ।
सत्यं तासामनलसदृशां संयमारामराज्यां
मा भूः पार्श्वेऽप्यसि यदि शिवावाप्तये बद्धबुद्धिः ॥३३॥

हे विवेकिन् या एतास्तरुण्यो नार्यः तव प्रीतिं हर्षं तन्वन्ति
विस्तारयान्ति । कथंभूतास्तरुण्यः । अनलसदृशः न अलसे अनलसे आलस्यरहिते
३ दृशौ+ यासां ताः अनलसदृशः । उन्निद्रनेत्रा[200] इत्यर्थः । पुनः किंविशिष्टास्तरुण्यः ।
कनकनिभया स्वर्णतुल्यया देहद्युत्या शरीरकान्त्या द्योतिताः प्रकाशिताः आशा
दिशो याभिस्ता द्योतिताशाः । संयमारामराज्यां संयमश्चारित्रं स एवारामः तस्य
६ राजी[201] परम्परा तस्यां विषये । तासां स्त्रीणामनलसदृशां अग्नितुल्यानाम् ।
सत्यं स्त्रीसंपर्काच्चारित्रवनदाहो भवत्येवेत्यर्थः । यदि त्वं शिवावाप्तये मोक्षप्राप्त्यै
बद्धबुद्धिः बद्धा बुद्धिर्येन स तादृशोऽसि तदा तासां[202] पार्श्वेऽपि समीपेऽपि मा
९ भूः । अत्र पद्ये अनलसदृशत्वम् एकत्र वर्णत्वेन अपरत्र दाहकशक्तित्वेन उपादानं
चित्रकृत् ॥ ३३ ॥

क इह विषयभोगं पुण्यकर्मायशून्यं
स्पृहयति विषभोगं[203] भावयेस्[204]तत्त्वतस्त्वम् ।
स्मरति न करणीयं मूर्च्छितो[205] येन जन्तुः
पतति कुगतिगर्ते नेक्षते[206] मोक्षमार्गम् ॥ ३४ ॥

इह अस्मिन् संसारे कः पुरुषो विषयभोगं पञ्चेन्द्रियसुखं स्पृहयति
वाञ्छति । कथंभूतं विषयभोगम् । पुण्यकर्मायशून्यं पुण्यकर्मणः आयो लाभः

---

198 यास्तवैतास्तरुण्यः A.. 199 द्योतितास्ता E. + आलस्यरहिता दृशः] N.
200 Omitted A; 201 राज्यं B. 202 अस्याः A. 203 विषभागं E.
204 भावयेत्° A· भावयंस्त° C D E Nn. 205 नेक्षते मोक्षमार्गम्
C D E Nn. 206 मूर्च्छितोयेन जन्तुः C D E Nn.

तेन शून्यम् । तत्त्वतः त्वं विषभोगं[207] भावयेः जानीयाः[208] । विषयभोगं विषभक्षण[209]- १
तुल्यं जानीहि इत्यर्थः । तदेव स्पष्टयति । येन विषयभोगेन मूर्च्छितः मोहं
प्राप्तः जन्तुः प्राणी करणीयं करणार्हं न स्मरति । पुनः मोक्षमार्गं न ईक्षते ।
कुगतिगर्ते पतति । विषभक्षणस्य[210] स्मरणादिभ्रंशकत्वं प्रकटमेव । विषयभोगं[211] ६
विषभोगं× कथम्[212] इत्यत्रोच्यते । कः पुण्यकर्मा पुमान् यशून्यं येन यकारेण
रहितं शून्यं विषभोगं[213] भवतीत्यर्थः ॥ ३४ ॥

सखे सुखं[214] वैषयिकं यदेत[215]-
दाभासते[216] तेऽन्तर[217] कान्तमन्तः[218] ।
सत्यं तदुत्सर्पदघप्रबन्ध[219]-
निबन्धनत्वान्नरकान्तमेव ॥ ३५ ।

हे सखे हे नर एतत् वैषयिकं विषयेभ्यो भवं वैषायिकं सुखं[220] ते तव
अन्तः चेतसि कान्तं मनोज्ञं यत् आभासते तत् सत्यं मिथ्या नेत्यर्थः । उत्सर्प-
दघप्रबन्ध निबन्धनत्वात् उत्सर्पन् प्रसरन्§ यः अघस्य पापस्य प्रबन्धः परम्परा ३
तस्य निबन्धनं कारणं तस्य भावः तत्त्वं[221] तस्मात् । नरकान्तमेव नरक एव
अन्तं† यस्य तत् नरकान्तं नरकप्रापकमित्यर्थः । अत्र पद्ये पूर्वत्र नरकान्तमिति
भिन्नं पदं[222] परत्र नरकान्तमिति समस्तं पदमिति चित्रकृत् ॥ ३५ ॥ ६

---

207 विषयभोगं A. 208 जानीहि BN. 209 विषयभक्षण° A.
210 विषयभ° A. 211 विषभोगं A; विषयभोगो N. × विषभोगो N.
212 From कथं upto विषभोगं omitted BN
213 विषयभोगं A. 214 सखेस्तु A. 215 तदेत° CDE; दहेत B
216 °भासहे D (Very probably the reading of the original of D was आभासते हे but the scribing failing to make it out correctly wrote आभासहे— thus putting a dash for the lacuna of one sylable). 217 हे CDE; यन्न° Nn.
218 °मेव CDE. 219 °घस्तबन्धं C. 220 Omitted A. § प्रसर्पन् N.
221 Omitted A. † अन्तो N. 222 भिन्नपदं AB.

स्मरक्रीडा[223]वाप्यां[224] वदनकमले पक्ष्मलदृशां[225]
[226]दृढासक्तिर्येषामधरमधु[227]पानं विदधताम् ।
[228]अदूरस्था बन्धव्यसनघटना क्लेशमहती
विमुग्धानां तेषामिह[229] मधुकराणा[230]मिव नृणाम् ॥ ३६ ॥

स्मरक्रीडावाप्यां स्मरस्य क्रीडार्थं[231] वापी तस्यां येषां मनुष्याणां पक्ष्मलदृशां स्त्रीणां वदनकमले वदनमेव कमलं तत्र दृढासक्तिः दृढा आसक्तिः तन्मयता वर्तते इति शेषः। किं कुर्वताम् येषाम्। अधरमधुपानं विदधतां अधरमेव मधु पुष्प[232]रसः तस्य पानं तत् कुर्वतां तेषां नृणाम् इह वदनकमले मधुकराणां भ्रमराणामिव बन्धव्यसनघटना बन्धेन बन्धनेन यद् व्यसनं कष्टं तस्य घटना रचना अदूरस्था समीपवर्तिनी भवति। कथंभूतानां मधुकराणां नृणां च। विमुग्धा[233]नां मोहदशां प्राप्तानाम्। कथंभूता बन्धव्यसनघटना। क्लेशमहती क्लेशेन महती दुःसहा। यथा भ्रमराणां कमले मधुपानं कुर्वतां दृढासक्तिर्बन्धनकष्टदायिनी तथा नृणां स्त्रीमुखकमलेऽधररसपानं कुर्वतां बन्धनादि* कष्टं भवतीत्यर्थः ॥३६॥

सखे संतोषाम्भः पिब चपलतामुत्सृज निजां
शमारामे कामं विरचय रुचिं चित्तहरिण ।
[234]हरन्त्येषां तृष्णां न युवतिनितम्बस्थलभुवो
विमुक्ता नीरागैर्विषमशरसम्पातविषमाः ॥ ३७ ॥

---

223 स्मरकृता° C. 224 °वाप्या CDE. 225 °दृशो CDE. 226 °शक्ति° ACDE. 227 पानं Omitted C. 228 The third and the fourth lines occur as the fourth and third respectively. CDENn. 229 °मिव A. 230 °कराणां च भवति A. 231 स्मरक्रीडार्थं N, स्मरस्य क्रीडार्थे B. 232 Both AB read here अधरमेव मधु पुष्परसं तत् कुर्वतां etc. 233 विमुक्तानां B. * वधबन्धनादि N. 234 The third and the fourth lines occur as the fourth and the third respectively CDE. The MSS. also agree in reading the third line (i. e. the fourth according to them) as हरन्त्येताः प्राणान् न युवतिनितम्बस्थलभुवः । हरन्त्येतां; (evidently a confusion of हरन्त्येताः and हरन्त्येषां) B, हरन्त्येतास्तृष्णां N; हरन्त्येताः प्राणान् Nn.

हे सखे हे चित्तहरिण चित्तमेव हरिणो मृगः तस्य संबोधनम् । चित्तस्य चाञ्चल्यान्मृगसदृशत्वम् । संतोषाम्भः पिब संतोष एवाम्भो जलं त्वं पिब । निजां स्वकीयां चपलतां चापल्यं† मुत्सृज त्यज । कामम् अत्यर्थम् । शमारामे शम एव आरामस्तस्मिन् उपशमवने रुचिं तुष्टिं विरचय कुरु । मृगस्य वनेऽधिकरुचित्वात् इष्टोपदेशः । एता युवतिनितम्बस्थलभुवः युवतीनां नितम्बः× पृष्ठभागः स एव स्थलभूमयः तव तृष्णां तृषां न हरन्ति न दूरीकुर्वन्ति । स्थलभुवं दृष्ट्वा तृष्णापहारो न भविष्यतीत्यर्थः†† । कथंभूता युवतिनितम्बस्थलभुवः । [२३५]नीरागैर्विमुक्ताः नीराणि च अगाश्च नीरागाः तैः जलवृक्षैः विमुक्ताः जलेन वृक्षच्छायया च तृषाहानिर्भवति । पुनः कथंभूता युवतिनितम्बस्थलभुवः । विषमशरसंपातविषमाः विषमा असह्याः ये शरसंपाताः बाणपाताः तैर्विषमा दुष्टाः । अस्यां भुवि व्याधादिभिः बाणपातो विधीयते तेन तव मरणं भविष्यति न तु तृषाहानिरित्यर्थः । [२३६]पक्षे कथंभूता युवतिनितम्बस्थलभुवः । नीरागैः रागरहितैः पुरुषैः+ विमुक्तास्त्यक्ताः विषमशरः कामः तस्य संपातेन विषमाः अमनोज्ञाः । एतेन युवतिनितम्बवाञ्छां मा कुरु इति चित्तं प्रत्युपदेशः ॥ ३७ ॥

चेतश्चापलमाकलय्य कुटिलाकारां कुरङ्गीदृशो
दृष्ट्वा कुन्तलराजिमञ्जनघनश्यामां किमुत्ताम्यसि ।
धर्मध्यानमहानिधानमधुना स्वीकर्तुकामस्य मे*
प्रत्यूहार्थमुपस्थितेयमुरगश्रेणीति संचिन्तयेः ॥ ३८ ॥

हे चेतः त्वं कुरङ्गीदृशो मृगाक्ष्याः कुन्तलराजिं शिरोरुहश्रेणिं दृष्ट्वा चापलमाकलय्य चाञ्चल्यं गृहीत्वा किमु[२३७]त्ताम्यसि आकुलतां करोषि । कथंभूतां

---

† चापल N. × नितम्बाः पृष्ठभागाः त एव N. †† भवती° N. These two sentences are omitted. AB. 235 From नीरागैः upto स्थलभुवः omitted. A. 236 For this whole sentence A reads only युवती. + Omitted. N. * ते Nn. 237 किमु॰उत्तम्यसि A.

कुन्तलराजिम्। कुटिलाकारां कुटिलो वक्र आकारो यस्यास्ताम्। पुनः कथंभूतां कुन्तलराजिम्। अञ्जनघनश्यामां अञ्जनं कज्जलं घनो मेघः तद्वत् श्यामां कृष्णाम्। केशानां कृष्णत्वं यौवने, तद्युक्तां[238] स्त्रियं दृष्ट्वा[239] चित्तचलनं न्याय्यम्। उक्तं च —

'पुष्पं दृष्ट्वा फलं दृष्ट्वा दृष्ट्वा च[240] नवयौवनाम्।
द्रविणं पतितं दृष्ट्वा कस्य नो चलते[240a] मनः ॥' इति।

मे मम प्रत्यूहार्थं विघ्नार्थं अधुना इदानीं उपस्थिता प्राप्ता इयं उरगश्रेणी सर्पपरम्परा इति त्वं संचिन्तयेः जानीयाः। कथंभूतस्य मे। धर्मध्यानमहानिधानं स्वीकर्तुकामस्य अङ्गीकुर्वतः धर्मध्यानं धर्मचिन्तनं तदेव महानिधानम्। यत्किंचित्कार्यकरणोद्यतस्य सर्पदर्शनं निषिद्धम्। निधानस्वीकारे तु सर्पदर्शनमतीव नेष्टमित्यर्थः। (कु)न्तलस्य सर्पोपमानत्वं कविसम्मतमेव ॥ २८ ॥

यातुं यद्यनुरुच्यते[241] शिवपुरीं रामानितम्बस्थलीं
मुञ्चेर्दूरमिमामनङ्गकलभ‡‡क्रीडाविहारोचिताम्।
नो चेद्यौवनचण्डवातविततव्यामोहधूलीकण-
क्लाम्यद्दृष्टिरदृष्टशाश्वतपथः प्राप्तोऽसि¶ जन्माटवीम् ॥ २९ ॥

हे पुमन् यदि तुभ्यं शिवपुरीं मुक्तिनगरीं यातुं गन्तुमनुरुच्यते तदा त्वं इमां रामानितम्बस्थलीं स्त्रीनितम्बभूमिं दूरं दूरतो मुञ्चेः। कथंभूतां रामानितम्बस्थलीम्।

---

238 तद्युक्तं A. 239 Omitted A. 240 स्त्रीनवयौवनम् A. 240a लोचनते A. 241 °रुध्यते AB. But A originally appears to have read °रुच्यते, the च्य being changed into ध्य by the scribe himself; °रुध्यते e; °रुध्यसे CNn; रुच्यसे D. ‡‡ °हरिणक्रीडा° Nn. ¶ प्राप्तासि AB; प्राप्नोषि N.

अनङ्गकलभक्रीडाविहारोचिताम् अनङ्गः कामः स[242] एव कलभः गजशिशुः तस्य क्रीडार्थं विहारो विहरणं तत्र उचितां योग्याम् । चेत् इमां [243]दूरं न मुञ्चसि तदा किं भविष्यति तदाह नो चेदिति । त्वं जन्माटवीं संसाराटवीं प्राप्तोऽसि ।[244] कथं-भूतस्त्वम् । यौवनचण्डवातविततव्यामोहधूलीकणक्राम्यद्दृष्टिः यौवनं एव चण्डवातः तेन विततं* विस्तारितं व्यामोहो वैचित्त्यं स एव धूलीकणं§ तेन क्राम्यन्ती व्याकुला दृष्टिर्यस्य तथाविधः । अत एव अदृष्टशाश्वतपथः न दृष्टः शाश्वतस्य शिवस्य पन्था मार्गो येन सः । रजःकणपतनात् दृष्ट्यां[245] मार्गावलोकनं[246] न भवत्येवेति‡ ॥ ३९ ॥

शमधनमपहर्तुं कामचौरप्रचारं[247]
विरचयति निकामं कामिनीयामिनीयम् ।
सपदि विदधती या मोहनिद्रासमुद्रां×
जनयति जनमन्तः सर्वचैतन्यशून्यम् ॥ ४० ॥

इयं कामिनीरूपा यामिनी रात्रिः निकाममत्यन्तं कामचौरप्रचारं काम एव चौरः तस्य प्रचारं विहरणशीलत्वं विरचयति प्रकटीकुरुते । किं कर्तुम् । शमधनमपहर्तुं शम उपशम एव धनं तद्[248] गृहीतुं, यामिन्यां धनहरणार्थं[249] चौर-प्रचारो भवति । या यामिनी जनं मनुष्यं अन्तः सर्वचैतन्यशून्यम्, अन्तरिति अन्तःकरणे सर्वं च तत् चैतन्यं च तेन शून्यं रहितं जनयति करोति । यामिनी किं कुर्वती । सपदि तत्कालं मोहनिद्रासमुद्रां मोहः मूर्छा एव निद्रा तस्याः समुद्रां समृद्धिं विदधती इत्यर्थः[250] ॥ ४० ॥

242 स omitted A. 243 मदुरं A 244 प्राप्नोषि AN. * विततः विस्तारितः N. § °कणः N. 245 दृष्ट्वा A B N. 246 °नुलोकनं B. ‡ °त्यर्थः N. 247 °चोर° E. × °द्रामगुद्रां Nn. 248 तद् omitted A B. 249 °हरणोर्थं B. 250 Omitted BN.

मृगेक्षणा नूनमसावसीमा
भीमाटवी बुद्धिमतामतीत्या[251] ।
यद्बाहुवल्लीभिरनङ्गभिल्लो
बद्धा[×] नरान् लम्भयते न मुक्तिम् ॥ ४१ ॥

नूनं निश्चितं असौ मृगस्य आक्षिणी इव अक्षिणी यस्याः सा मृगेक्षणा स्त्री भीमाटवी भयानकारण्यं वर्तते इति शेषः। कथंभूता भीमाटवी। असीमा न विद्यते सीमा मर्यादा यस्याः सा[252]। पुनः कथंभूता। बुद्धिमतां विदुषाम् अतीत्याऽतिक्रमणीया। यद्बाहुवल्लीभिः यस्या मृगेक्षणाया बाहव एव वल्यो लतास्ताभिः अनङ्ग एव भिल्लस्तस्करः नरान् मनुष्यान् बद्ध्वा मुक्तिं न लम्भयते न कारयति[‡]। यथा अटव्यां तस्करः पथिकान् लताभिर्बद्ध्वा सर्वस्वं गृह्णाति तथा मृगेक्षणापि कण्ठग्रहणं कृत्वा नरान् मुक्तिप्राप्तिं न कारयतीति भावार्थः ॥ ४१ ॥

इयं वारंवारं[253] द्युतितुलितलोलम्बवलयं[254]
न वक्रं भ्रूचक्रं चलयति मृगाक्षी[255] मम पुरः।
कुधीः[256] कारागारापसरणमतिं[257][258] मां स्खलयितुं[259]
प्रपञ्चात्पञ्चेषोर्वहति[260] निबिडं लोहनिगडम् ॥ ४२ ॥

इयं मृगाक्षी मृगलोचना स्त्री मम पुरः पुरस्तात् वक्रं भ्रूचक्रं वारंवारं अनुवेलं न चलयति। कथंभूतं भ्रूचक्रं। [261]द्युतितुलितलोलम्बवलयं द्युत्या कान्त्या

251 °मतीत्य D E; °मतीव Nn. × बद्धान् Nn. 252 Omitted ABN. ‡ AB add here अपि तु लम्भयते एव. 253 °तारद्युति° E; °रद्युति° (one syllable less) C; °द्युति (two syllables less) A. 254 °लुलित° E. 255 चलाक्षी Nn. 256 कुधा C D E Nn. 257 रागागारा° C E. 258 °पसरकुमतिं E. 259 स्खलयति]A; चलयितुं E; छलयितुं Nn. 260 प्रपञ्चात् C D E Nn. 261 °द्युतिवलित° A.

तुलितः समानीकृतो रोलम्बानां भ्रमराणां वलयो वृत्तता येन । किमेतत् तदाह । मां स्खलयितुं गमनाभावं कर्तुं पञ्चेषोः पञ्च इषवो बाणा यस्य तादृशस्य कामस्य[262] निबिडं दुःसहं लोहनिगडं वहति धारयति । किंभूतं लोहनिगडम्[263] । प्रपञ्चितं[264] प्रपञ्चयुक्तम् । कथंभूतं माम् । कुधीकारागारापसरणमतिं कुत्सिता धीः कुधीः सैव कारागारो बन्दिस्थानं तस्मादपसरणे दूरगमने[265] मतिर्यस्य तम्[266] । यथा चौरस्य लोहनिगडं क्षिप्त्वा कारागारे क्षिप्यते । तथा मामपि कर्तुं भ्रूचक्रं कामस्य निगडं धत्ते इत्यर्थः ॥ ४२ ॥

यामोऽन्यत्र द्रुततरमितो मित्र यत् कण्ठपीठे
नायं हारश्चकितहरिणीलोचनायाश्चकास्ति ।
नाभीरन्ध्रे विहितवसतिर्योऽस्ति कन्दर्पसर्पः
तन्मुक्तोऽयं स्फुरति रुचिरः किंतु निर्मोकपट्टः ॥ ४३ ॥

हे मित्र वयमितः अस्मात् स्थानात् अन्यत्र यामो गच्छामः । चकित-हरिणीलोचनायाः चकिता त्रस्ता या हरिणी तस्याः लोचने इव लोचने यस्याः तस्याः कण्ठपीठे यत् चकास्ति शोभते अयं हारो नास्ति किन्तु यः कन्दर्पसर्पः कन्दर्पः[267] कामः स एव सर्पः तन्मुक्तः तेन सर्पेण मुक्तः तन्मुक्तः अयं रुचिरो मनोज्ञः निर्मोकपट्टः कञ्चुकः[268] स्फुरति चकास्ति । कथंभूतः कन्दर्पसर्पः । नाभीरन्ध्रे विहितवसतिः नाभीरन्ध्रे नाभीकुहरे विहिता कृता वसतिः वासः येन स नाभीरन्ध्रे विहितवसतिः । अयमेवान्यत्र गमने हेतुः । सर्पकञ्चुकदर्शनमपि भयावहम् । नाभीं सर्पबिलं हारं सर्पकञ्चुकं तद्बुध्या पलायनं युक्तमित्यर्थः ॥४३॥

यः कामकामलविलुप्तविवेकचक्षुः
स्वर्गापवर्गपुरमार्गमवीक्षमाणः[269] ।

---

262 Omitted A. 263 किं०लोहप्र० B. 264 प्रपञ्चवत् B; प्रपञ्चतत् A.
265 दूरीगमने AB. 266 तथा A. 267 Omitted B.
268 Omitted A. 269 °वीक्ष्यमाणः A B; °वेक्ष्यमणः D Nn.

ज्ञानाञ्जनं प्रति निरादरतामुपैति
भ्रातः पतिष्यति स भीमभवान्धकूपे ॥ ४४ ॥

यः पुरुषः ज्ञानाञ्जनं ज्ञानमेव अञ्जनं प्रति निरादरतामुपैति निरादरं करोति। कथंभूतो यः। कामकामलविलुप्तविवेकचक्षुः कामः स्मरः स एव कामलो नेत्ररोगस्तेन विलुप्तं विवेक एव चक्षुर्यस्य स कामकामलाविलुप्तविवेकचक्षुः। अत एव स्वर्गापवर्गपुर[२७०]मार्गमवीक्षमाणः स्वर्गो देवलोकः अपवर्गो मोक्षः तावेव *पुरौ नगरौ तयोर्मार्गः तं अवीक्षमाणः अदर्शकः एवंविधः स पुरुषः। हे भ्रातः। भीमभवान्धकूपे भीमो भयानको भवः संसारः स एव अन्धकूपः तस्मिन् पतिष्यति। यः कामलरोगग्रस्तचक्षुः अञ्जनं प्रत्यादरं न करोति सोऽन्धकूपे पतत्येवेति ॥४४॥

भवारण्यं मुक्त्वा[२७१] यदि जिगमिषुर्मुक्तिनगरीं
तदानीं मा कार्षीर्विषयविषवृक्षेषु[२७२] वसतिम्।
यतश्छायाप्येषां प्रथयति महामोहमचिरा-
दयं जन्तुर्यस्मात् पदमपि न गन्तुं प्रभवति ॥ ४५ ॥

हे पुमन् भवारण्यं संसाराटवीं मुक्त्वा त्यक्त्वा यदि मुक्तिनगरीं शिवपुरीं जिगमिषुः गन्तुमिच्छुः असि तदानीं विषयविषवृक्षेषु विषया[२७३] एव विषवृक्षा[२७४]स्तेषु वसतिं रतिं त्वं मा कार्षीः मा कुर्याः। यतो यस्मात् कारणात् [[२७५]एषां विषवृक्षाणां छायापि अचिरात्] [२७६]महामोहं महतीं मूर्छां प्रथयति विस्तार-

---

270 A omits पुरमार्ग. * पुरे नगरे N. 271 मुक्ता B. 272 °विषभोगेषु E. 273 विषयाण्येव B; विषयान्येव A. 274 From विषवृक्षाः upto the end of this sentence omitted A, which reads वि(ष)मेव महामोहं महतीमूर्छां प्रथयति विस्तारयति यस्मान् महामोहात् अयं जन्तुः प्राणी etc. 275 The words in the rectangular bracket omitted AB. 276 From महामोहं upto मोहात् omitted B.

यति यस्मात् महामोहात्[276] अयं जन्तुः प्राणी पदमपि पादमात्रमपि गन्तुं गमनाय
न प्रभवति न समर्थो भवति। यथा अरण्यं मुक्त्वा नगरीं गन्तुकामो नरो विष- ६
वृक्षाधो वसन् मत्तो भवति तदा पदमात्रमपि न गन्तुं शक्नोति तद्वत् संसारं
मुक्त्वा[277] मुक्तिमभिलषता पुंसा विषयसेवायां मतिर्न कार्येति तात्पर्यार्थः। ॥ ४९ ॥

सोमप्रभा चार्यमभा च यन्न
पुंसां तमःपङ्कमपाकरोति ।
तदप्ययमुष्मिन्नुपदेशलेशे
निशम्यमानेऽनिशमेति[278] नाशम् ॥ ४६ ॥

इति श्रीशतार्थवृत्तिकारश्रीसोमप्रभाचार्यविरचिता[279] शृङ्गारवैराग्यतरङ्गिणी[280]
संपूर्णा[281] ॥

सोमप्रभा चन्द्रकान्तिः च पुनः अर्यमभा अर्यम्णः सूर्यस्य भा× कान्तिः
यत् पुंसां मनुष्याणां तमःपङ्कं अज्ञानान्धकारसमूहं न अपाकरोति [282] दूरीकरोति
तदपि अन्तर्गतान्धकारमपि अमुष्मि उपदेशलेशे अल्पोपदेशे निशम्यमाने ३
श्रूयमाणे सति अनिशं निरन्तरं नाशमेति नाशं प्राप्नोति । चन्द्रसूर्यप्रभाभ्या[283]ऽज्ञाना-
न्धकारं दूरीकर्तुं न शक्यते। अनेनोपदेशेन अन्तर्गतान्धकारमपि दूरीकर्तुं शक्यते
इत्यतोऽस्योत्कृष्टत्वम्। अत्र पद्ये ग्रन्थकर्त्रा सोमप्रभाचार्य इति स्वनाम गोपितं ६
चातुर्येणेति बोध्यम् ॥ ४६ ॥

---

277 मुक्ता B. 278 °नो न समेति A (which is evidently corrupt for नोनिशमेति); समुपैति CDENn. 279 श्रीसोमप्रभाचार्यविरचितं A; श्रीशतार्थिसोमप्रभाचार्यकृता D; सोमनाथविरचिता E; This expression giving the name of the author is altogether omitted C. 280 शृङ्गारमुक्तावली E; शृङ्गारवैराग्यमुक्तावली C; सूक्तमुक्तावली D. 281 सम्पूर्णम् AB; समाप्ता E; N omits this colophon altogether.
× Omitted N. 282 Omitted A. 283 °सूर्यस्य प्रभया A.

संवे[284]च्छरद्विपमुनीन्दुसितस्य [285]मासि
　　मार्गे त्रयोदशमिते दिवसे भृगौ च ।
स्वल्पा तरी*विरचिता सुखबोधिकाख्या
　　क्लेशौघदुस्तरतरङ्गिणिकासुशास्त्रं ॥ १ ॥

आगरानाम्नि नगरे नन्दलालेन धीमता
　　दानवै[286]शालिकशिष्यानुरोधेन कृपया गुरोः ॥ २ ॥ युग्मम् ॥

सोमप्रभाचार्यकृतिं सुदुर्गमां
　　विवृण्वता स्वल्पधिया मयात्र यत् ।
न्यूनाधिको[287]ट्टङ्कनमल्पबुद्धितः
　　कृतं विशोध्यं कृतिभिः कृपालुभिः ॥ ३ ॥

श्रीजिनभक्तिसूरीन्द्रे गच्छे§ साम्राज्यं*बिभ्रति ।
　　अशेषमनुजवृन्दनतपादाम्बुजद्वये ॥ ४ ॥

इति श्री[288]शतार्थवृत्तिकारश्रीसोमप्रभाचार्यविरचितायाः [289]शृङ्गारवैराग्यतरङ्गिण्याः
सुखबोधिका[290]नाम्नी[291] वृत्तिः[292] सम्पूर्णा[293] ॥

284 संवत्सर AN (which latter suggests the correct reading in a bracket). 285 मासे AN. * तरी विर° N. 286 दानविशाल BN. 287 °कोदंकित° A; °कोदंकन° B. § गच्छ N. * Both AB read साम्राज्य (without the अनुस्वार). 288 Omitted A; शतार्थि-सोमप्रभां Nn. 289 श्रीश्रृङ्गारवैराग्यतरङ्गिणीटीका A. 290 Omitted A. 291 Omitted A. 292 Omitted A. 293 सम्पूर्णम् A; N gives the colophon as:- इति सुखबोधिकानाम्न्या वृत्त्या समेता श्रीशतार्थवृत्तिकार-श्रीसोमप्रभाचार्यविरचिता श्रृङ्गारवराग्यतरङ्गिणी समाप्ता ॥

Appendix A

[Here is given the text and explanatoryr emarks corresponding to the work of सोमप्रभसूरि from a MS. in a collection at the Nasik Oriental Research Institute, Nasik].

लसितेष्वेषु केशेषु क्लेशधीर्न कथं तव ॥ १ ॥
लेन सिता युक्ताः केशाः क्लेशा इति शब्दसन्धिः ॥ १ ॥

कथं वा नेक्षसे कुन्तमलमालोक्य कुन्तलम् ॥ २ ॥
नास्ति लकारो यस्मिन् स कुन्तलः कुन्तपदार्थः पर्यवस्यति ॥ २ ॥

मन्यस्व यमितान् बालान् व्यालानेव मृगीदृशः ॥ ३ ॥
यकारेण मिता बाला व्याला भवन्तीति तत्त्वम् ॥ ३ ॥

त्वं न वक्रकचान् मन्यस्व नवक्रकचास्तु ते ॥ ४ ॥
वक्रकचा न किन्तु नवक्रकचा एवेति ॥ ४ ॥

अहीनमधरं विद्धि धरमेव धरातले ॥ ५ ॥
एन हीनोऽधरो धरो भवति ॥ ५ ॥

यदाननं कोपपदं सखे काननमेव तत् ॥ ६ ॥
ककार उपपदमादिर्यस्य तदाननं काननं भवति ॥ ६ ॥

न साकारं मुखं किन्तु मायानाटकमामुखम् ॥ ७ ॥
आकारेण सहितं मुखमामुखं भवति । तच्च प्रस्तावनापदार्थः ॥ ७ ॥

वदनं त्वं साधुरदं कथं जानासि नो वनम् ॥ ८ ॥
साधुरं [r.रदं] च अदं दकारहीनं वदनं वनं भवति शोभनदन्तम् ।८॥

सर्वदास्यं स्त्रियो नूनं सर्वदास्यविधायकम् ॥ ९ ॥
सर्वेषां दास्यमिति ॥ ९ ॥

दृष्टिपातः परमदः स्फुटमृष्टिनिपातनम् ॥ १० ॥

नास्ति दः यस्मिन् [स दृष्टि] पदार्थः ऋष्टिरिति फलति । सा च खड्गविशेषः ॥

अरमस्या भ्रुवं वीक्ष्य कलमारिभुवं धिया ॥ ११ ॥

रेफरहिता भ्रूर्भूर्भवति ॥ ११ ॥

ईदृग्भवा [लिकं] माया मालीकं तेन पश्यसि ॥ १२ ॥

आलिकमीकारदृष्ट्या ईक्षितमलीकं भवति । तच्चासत्यमित्यर्थः ॥ १२ ॥

अलं कुण्डलमेतस्याः कुण्डं कामाग्निदीपकम् ॥ १३ ॥

[ना] स्ति लो लकारो यस्मिन् तत् कुण्डलं कुण्डमेवेति ॥ १३ ॥

ताडङ्केषु लसद्बुद्धिस्ताडं कं नाप्नुयादिह ॥ १४ ॥

ताडङ्कं ताडं ताडनं कं इति पदच्छेदः । पदद्वयं ज्ञेयम् ॥ १४ ॥

अपरं गरलं मोक्षार्गलं बावेहि तद्गलम् ॥ १५ ॥

रेफरहितं गरलं गलशब्देन व्यवह्रियते ॥ यद्वा अर्युक्तं गलमर्गलमेव ॥ १५ ॥

अरं स्पर्शं किमु स्तौषि स्पशं कामादिवैरिणाम् ॥ १६ ॥

रेफरहितः स्पर्शः स्पशो भवति स च दासवाची शब्दः ॥ १६ ॥

विनापूर्वं स्तनतटं जानीह्यस्ततटं विदः ॥ १७ ॥

विगतः नकारः अकारः पूर्वो यस्य तत् स्तनतटमस्ततटं भवति ॥ १७ ॥

योध एव महाँल्लोकेष्वपरस्तत्पयोधरः ॥ १८ ॥

अपगतौ पकाररेफौ यस्मात् स पयोधरो योध एव ॥ १८ ॥

मूढैर्गीतो भुजस्त्वस्या भुजगीति त्वयेक्ष्यताम् ॥ १९ ॥

गीतिवर्णेन इतो युक्तो भुजः भुजगीति स्फुटम् ॥ १९ ॥

ज्ञायते किल लोके न नवाहौ भयधीः कथम् ॥ २० ॥

नवश्चासावहिः सर्पः बाहुपक्षे स्फुटम् ॥ २० ॥

तद्दोषात्यन्तसम्पर्कं कथं स्वस्मिन्न पश्यति ॥ २१ ॥

तस्या दोष्णा न संपर्कः किन्तु महादोषसम्पर्क इति जानीहि । एवं तात्पर्यम् ॥ २१ ॥

परमंगदमाज्ञाय कुरु गोविन्दचिन्तनम् ॥ २२ ॥

उत्कटं गदं ज्ञात्वा तत्परिहाराय गोविन्दचिन्तनं विधेयम् ॥ अच्युतानन्त-गोविन्देति नाम्नां रोगापहारकत्वम् ॥ २२ ॥

सदयं वलयं नाम बलं भवमहीपतेः ॥ २३ ॥

वलयं अयं यकाररहितं सत् भवमहीपतेः संसारलक्षणराज्ञः बलं भवति । तन्मूलकत्वात् संसारस्येति । पक्षे सन् अयः शोभनविधिर्यस्मिन् वलये तस्यैव सौभाग्यासाधारणकारणत्वात् ॥ २३ ॥

इमे कान्ताः करा मूढ सत्यन्ताः करका दृढाः ॥ २४ ॥

ककारोऽन्ते येषामेवंभूताः कराः करका भवन्ति ॥ २४ ॥

हारं नीव्यासमेतस्या नीहारं विद्धि हृद्भुवि ॥ २५ ॥

नीवर्णेन व्याप्त युक्तं हारं नीहारं विद्धि । पक्षे वसनग्रन्थिस्पर्शी ॥ २५ ॥

अङ्गनोदरमस्माकं दरमित्येव निश्चिनु ॥ २६ ॥

अङ्गेति सम्बोधनम् । न उदरं किन्तु नोऽस्माकं दरं भयदायीति स्वमनस्य-वधारयेति सफलोऽर्थः ॥ २६ ॥

तत्त्वदृक्चेन्मोहकृत् स्यात् क्वचित् किमुदरं भवेत् ॥ २७ ॥

किम् उदरं किमु दरमित्युभयत्रापि पदयोजनेति पूर्वार्थकमेव पद्यमिति ॥ २७ ॥

नाभीमयं स्थलं नाभीमयमित्यर्थतः स्फुटम् ॥ २८ ॥

अभयप्रचरं न भवतीति ॥ २८ ॥

अपूर्वं विजनं सज्जघनं मूर्तमघं सखे ॥ २९ ॥

अकारः पूर्वः विगतौ जनौ वर्णौ यस्मात् इत्यघं भवति । तच्च पापम् ॥ २९ ॥

अजानुरागि जघनं विघ्नविध्वंसकं घनम् ॥ ३० ॥

जकारेणानुरागि युक्तं भवति जघनं घनमेव जानीहि । तं च ज्ञानलक्षणहंससुख-विरोधिनं जानीहीति योजना । पक्षे स्वनिर्मिते वस्तुनि स्वकीयानुरागः सर्वजनसिद्धः ॥ ३० ॥

अतो नितम्बस्तन्वङ्ग्या निम्ब इत्यवधारय ॥ ३१ ॥

नास्ति तकारो यस्मिन् स नितम्बो निम्ब एव ॥ स च कटुः। पक्षे तथाविध-जघनवर्णनादेव हतः शृङ्गारः ॥ ३१ ॥

नूनं नूपुरमेतस्याः पुरमेवारिसंस्थितेः ॥ ३२ ॥

नूवर्णेनोनं नूपुरं पुरमेव ॥ ३२ ॥

सदादिशानया पश्य स्त्री शस्त्रीति मनोभुवः ॥ ३३ ॥

आदौ शकारो यस्याः सा स्त्री शस्त्रीति मनोभुवः नीतिरहिता च अर्थान्तरे स्फुटमेव ॥ ३३ ॥

इयं वधूरवसिता खलधूरेव केवलम् ॥ ३४ ॥

वकारेण सिता युक्ता न भवति या वधूः सा धूरेव केवल खलानाम् ॥३४॥

यो यो विषयभोगोऽस्ति तत् सर्वं विषभोजनम् ॥ ३५ ॥

नास्ति यकारो यस्मिन् स विषयभोगो विषभोगः। पक्षे स्फुटोऽर्थः ॥ ३५ ॥

सुखं वैषयिकं नाम नरकान्तं स्फुटार्थकम् ॥ ३६ ॥

नरकोऽन्ते यस्येति। पक्षे नरसम्बोधनम्। कान्तं रम्यम्। ककारोऽन्ते यस्येति वा ॥

सारं वदन्ति शृङ्गारं शृङ्गमेवारिभूभृतः ॥ ३७ ॥

अरेण सहितं शृङ्गमेव अरिगिरेः शृङ्गारमित्यज्ञानिनो वदन्ति ॥ ३७ ॥

विशारदं पदं तस्या विपदं विद्धि केवलम् ॥ ३८ ॥

विना शारदं युतं पदं विपदं विद्धि ॥ ३८ ॥

न नखोल्लसनं किन्तु काका खोल्लसनं स्फुटम् ॥ ३९ ॥

खं शून्यं मिथ्येति यावत् ॥ ३९ ॥

Appendix B

A conspectus showing the correspondence of the stanzas in the five MSS. the Nirṇaysāgara Edition, the MS. referred to in the foot-note in that edition and the MS. reproduced in Appendix A.

[It may be observed that MSS. A and B and the NSP. edition agree in full; so do MSS. CDE and the one referred to in the foot-notes in the NSP. edition. The text produced in Appendix A appears to correspond for the major portion with CDE & Nn., though it has some stanzas which have no counterpart in any of our MSS. and itself has no counterpart for some of the verses in them. The correspondence in point of order is worth noticing. The MS. F reproduced in Appendix A is evidently incomplete.].

A	B	C	D	E	N	Nn	F
1	1	1	1	1	1	—	3
2	2	2	2	2	2	—	1
3	3	3	3	3	3	—	4
4	4	4	4	4	4	—	2
5	5	12	12	12	5	—	12
6	6	11	11	11	6	—	11
7	7	10	10	10	7	—	10
8	8	6	6	6	8	—	6
9	9	7	7	7	9	—	7
10	10	9	9	9	10	—	9
11	11	8	8	8	11	—	8
12	12	5	5	5	12	—	5
13	13	13	13	13	13	—	13
14	14	14	14	14	14	—	14
15	15	15	15	15	15	—	15

A	B	C	D	E	N	Nn	F
16	16	16	16	16	16	—	16
17	17	17	17	17	17	—	17
18	18	36	36	36	18	—	×
19	19	19	19	19	19	—	19
20	20	20	20	20	20	—	20
21	21	21	21	21	21	—	21
22	22	22	22	22	22	—	22
23	23	23	23	23	23	—	23
24	24	24	24	24	24	—	24
25	25	25	25	25	25	—	25
26	26	26	26	26	26	—	26
27	27	27	27	27	27	—	28
28	28	28	28	28	28	—	30
29	29	29	29	29	29	—	31
30	30	30	30	30	30	—	32
31	31	31	31	31	31	—	33
32	22	32	32	32	32	—	34
33	33	33	33	33	33	—	×
34	34	34	34	34	34	—	35
35	35	35	35	35	35	—	36
36	36	37	37	37	36	—	×
37	37	38	38	38	37	—	×
38	38	39	39	39	38	—	×
39	39	40	40	40	39	—	×
40	40	41	41	41	40	—	×
41	41	42	42	42	41	—	×
42	42	43	43	43	42	—	×
43	43	44	44	44	43	—	×
44	44	45	45	45	44	—	×
45	45	46	46	46	45	—	×
46	46	47	47	47	46	—	×
×	×	18	18	18	×	18	18
×	×	×	×	×	×	—	27
×	×	×	×	×	×	—	29
×	×	×	×	×	×	—	37
×	×	×	×	×	×	—	38
×	×	×	×	×	×	—	39

N. B. :--- × This sign shows that this MS. has no stanza corresponding to the number in the other columns.

Index A

[Alphabetical index of stanzas from the text. Figures indicate the numbers of the stanzas in the text.]

अयं जनो वलयभरं	२३
अलं कृतं कुन्तलभार०	४
अलं प्राप्य स्पर्शं	१६
इयं बारंबारं द्युति०	४२
एतस्या युवतेः पयोधरयुगं (पृष्ठ, १३ see Note 107)	
क इह विषयभोगं	३४
कण्ठावसक्ते कुपिते	२०
कण्ठोपकण्ठे लुलिते	१९
कन्दर्पद्विपकुम्भचारुणि	१८
कस्तूरिकातिलकितं	५
कामज्वरातुरमते तव	१०
कोयं विवेकस्तव	२१
चेतश्चापलमाकलय्य	३८
जङ्घोपयुक्तं जघनं	२८
तस्याः कोपपदं यदानन०	८
तस्याः साधुरदं विलोक्य	११
ताडङ्कं सस्पृहं तस्याः	१४
धर्मारामदवाग्नि०	१
न भातीदं भ्रातः	१३
न भ्रूरियं पङ्कजलोचनायाः	६
नवकुवलयदाम०	७
नितम्बमुल्लासित०	२९
नीव्यास्तमस्या हरिणे०	२५
नूनं नूपुरमेतदायत०	३०
पीनोन्नतं स्तनतटं	१७
प्रीतिं तन्वन्त्यनलसदृशो	३३
भवारण्यं मुक्त्वा यदि	४५
मृगेक्षणा नूनमसावसीमा०	४१
यः कामकामलविलुप्त०	४४
यातुं यद्यनुरुच्यते	३९
यामोऽन्यत्र द्रुततर०	४३
या स्त्रीति नाम्ना	३१
यियासस्सि भवोदधे०	१२
ये केशा लसिता०	२
ये दृक्पथे तव पतन्ति	२४
येयं वधूरवसिता	३२
ये शुद्धबोध०	३
विलोक्य किं सुन्दर०	२६
शमधनमपहर्तुं	४०
सखे सन्तोषाम्भः पिब०	३७
सखे सुखं वैषयिकं	३५
साकारमालोक्य मुखं	९
सारं गलं यदरविन्द०	१५
सोमप्रभा चार्यप्रभा च	४६
स्फूर्जन्मनोभवभुजङ्ग०	२७
स्मरक्रीडावाप्यां	३६
हंहो विलोक्य पर०	२२

Index B

Index of important words occurring in the text and the commentary. References are to the stanzas from the text.

st. 1 : मुक्तिनगरः
नगरः
यमित adj.

st. 2 : सहोदर (=सदृश) adj.
मूर्तिमत् adj.
परिचित (=युक्त) adj.

st. 3 : शुद्धबोधः
खण्डनम् (=कवलनम्)
ग्रासीकरोति
देहम् (neut.)
क्रकचः m.
करपत्रम्

st. 4 : कुन्तलः (=बद्धकेशाः)
भारः (=समूहः)
अन्तम् (neut.)
[illegible]रन्तम् (=दुःसह) adj.
अलङ्कृत adj.

st. 5 : वामभ्रूः (also st. 10)
अलिकम्
तिलकम्
अलीकम्

st. 6 : निबन्धनम् (=आविर्भाव)
धुतरा

st. 7 : प्रशमः
ऋष्टिः
तरवारिः

st. 8 : क्षोपपद adj.

st. 9 : साकार adj.
हि = निश्चितम्

st. 11 : अञ्जसा = वेगेन
दुर्ग adj.
अत्यन्त adj.
अद adj.

st. 12 : अहीन adj.
आस्फलनम्
विशदवासना = निर्मल-श्रद्धा

st. 13 : ओघः (=समूहः)
प्रतानम् (=समूहः)
तरलतरल adj.
शोकानङ्गज्वलनयुक्
दमः

st. 14 : ताडङ्कः

st. 15 : सार adj.
निगिरणम्
मुक्तिपुरम्
व्यासेधः (=निषेधः)

st. 16 : अलम् (=अत्यन्तम्)
कलुषम् (=पापम्)
वरटः A
भिल्लः
हेरिक (स्पश)
अवस्कन्दः (used with √दा)
अरम्

st. 17 : नरहित adj.
अपूर्व adj.
st. 18 : कष्टक्रिया
हस्तं दा
st. 19 : गराजित adj.
st. 20 : दोषावगूढ adj.
विगाहते
आतङ्कः
परीत adj.
सुन्दरासुन्दरयोः
st. 22 : अङ्गदम्
st. 23 : विलोकते
st. 24 : पल्लवनम्
अपवर्गः
कान्त adj.
st. 25 : नीव्यात adj.
st. 26 : दुर्गतिः
(also st. 32)
st. 27 : नाभीमय adj.
st. 28 : निम्बम्
अरिष्टम्
नोदः
अत्यन्तकटु adj.
कटुक adj.
अपनोदः
st. 29 : चङ्गिम adj.
उल्बण adj.
st. 30 : नूनम्
st. 31 : भटः
सुभटः (=वीरः st. 4)
शस्त्री
st. 32 : व्यतिकरः
निबन्धनम् (=कारणम्)
also st. 6
संसार (= जगत्)
अवसिता adj.
st. 33 : अनलसदृशः
संयमः
आरामराजी
शिवावाप्तये
st. 34 : पुण्यकर्माशयशून्य adj.
st. 35 : प्रबन्धः
नरकान्तम्
अन्तम्
st. 36 : पक्ष्मलदृशाम्
क्लेशामहती
st. 37 : नीरागैः
विषम adj.
विषमशर
st. 38 : चापलम्
st. 39 : शिवपुरीम्
जन्माटवीम्
वैचित्र्यम्
धूलीकणम्
शाश्वतपथः
st. 40 : समुद्रा
st. 41 : भीमाटवी
असीमा
अतीत्या adj.
भिल्लः
st. 42 ; तुलित adj.
रोलम्ब
वलयम्
स्खलयितुम्
निबिड adj.

बन्दिस्थानम्

st. 43 ; निर्मोकपट्टः

कञ्चुकः

हारम्

st. 44 : निरादरताम (उपेक्षा)

कामलः

पुरौ (पुर m.)

नगरौ (नगर m.)

अन्धकूपः

st. 45 : भवारण्यम्

शिवपुरी

मुक्तिनगरी

वसतिम्

st. 46 : सोमप्रभा

अर्यप्रभा

उपदेशलेशे

अनिशम् (ind.)